No. १२६१

Title अनुमिति परामर्श कार्यकारण भाव विचारः

Author महादेवः

Extent ३९ Age ×

Subject न्याय शास्त्रम्

न्या

अनुमिति परामर्श कार्यकारणभाव विचारः

१२७१

न्याय अनुमानमितिपरामर्श

१३४८. १२१६

१ श्रीगणेशाय नमः नत्वा शिवं न्यायरीत्या महादेवेन धीमता निरूप्यते परामर्शोऽनुमाहेतुत्वमद्भुतं १ सत्यपि पक्षतादिरूपसकलानुमितिसा
मग्रीसमवधाने परामर्शं विनाऽनुमित्यनुदयेनानुमितिं प्रति परामर्शो हेतुः स च व्याप्तिविशिष्टपक्षधर्मताज्ञानस्वरूपः व्याप्तिश्च स्वव्यापकसा
। ध्यसामानाधिकरण्यरूपा तथा च पर्वतो वह्निमानित्याद्यनुमितौ धूमव्यापकवह्निसमानाधिकरणधूमवान् पर्वत इत्याद्याकारकपरा
मर्शो हेतुरिति फलितमिति सिद्धांतः अत्र केचित् पर्वतो वह्निमानित्याद्यनुमितौ पर्वतीयधूमव्यापको वह्निरित्याद्याकारक एव परामर्शो
हेतुः न तूक्तः तद्धेतुत्वे कारणतावच्छेदककोटौ सामानाधिकरण्यविषयताया निवेशाधिक्येन गौरवापत्तेः अथ भवन्मते पर्वतीयधूमसमा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावादिघटितव्यापकतावगाहिज्ञानस्यैव हेतुत्वं फलितं एवं च शुद्धधूम
समानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावघटितव्यापकत्वावगाहिधूमव्यापकवह्निसमानाधिकरणधूमवान्प
र्वत इत्याकारकोपदर्शितपरामर्शकालेऽनुमित्युपल्लापो दुरुद्धर एवेति चेन्नैवं नहि वयं पर्वतीयधूमसमानाधिकरणाभावप्रतियोगिताव एम०
च्छेदकत्वत्वावच्छिन्नाभावादिघटितव्यापकतावगाहिज्ञानत्वेन हेतुत्वमंगीकुर्मो येनोक्तानुपपत्तिः स्यात् अपि तु धूमाधिकरणवृत्त्यभावप्रति १

योगितावच्छेदकत्वत्वावच्छिन्नप्रतियोगितासंबंधावच्छिन्नाधारपर्वतीयपक्षसमाधिकरणहृत्समभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नप्रकारता
तन्निरूपिताभाववन्निष्ठविषयतानिरूपितवह्नित्वनिष्ठविषयतानिरूपितावच्छिन्नत्वनिष्ठविषयतानिरूपितवह्निनिष्ठविषयताशालिज्ञा
नत्वेनहेतुत्वेवह्न्यमलत्वच्चनकदाचिदनुपपत्तिः उपदर्शितपरामर्शेतथाविधाभावप्रतियोगितावच्छेदकताहशावच्छेदकत्वत्वघटितकतया
पर्वतीयत्वस्याभानेपितथाविधप्रतियोगिविशेषणतावच्छेदकघटकतयोपलक्षणविधयाप्यंशेपर्वतीयत्वस्यभानांगीकारेणोप
दर्शितपरामर्शस्यानुमितिजनकतावच्छेदककोटावनतर्भावात्स्मादनुमितिसन्निसंभवेनानुमित्यपलापाभावात ऽप्यभवन्मतेपित्रा।
व्याप्यवृत्तिकपिसंयोगादीनांव्यापकत्वोपपत्तयेहेत्वधिकरणहृत्तमभावेस्वप्रतियोग्यनधिकरणवृत्तित्वरूपप्रतियोगिवैयधिकर
णपस्यावश्यंनिवेशनीयतयापर्वताद्युद्देश्यकगगनादिसाध्यकानुमित्यापत्तिः तत्रगगनाभावस्यप्रतियोग्यधिकरणाप्रसिद्ध्याऽ
प्रतियोग्यनधिकरणवृत्तित्वरूपप्रतियोगिवैयधिकरण्यासंभवेनताहशघटाभावप्रतियोगितानवच्छेदकत्वस्यगगनत्वेसत्त्वात्तत्रा
पितथाविधव्यापकत्वज्ञानसंभवादितिसामानाधिकरण्यविषयताः वश्यमनुमितिजनकतावच्छेदककोटौनिवेशनीयेतिचेन्न गगनादावह।

२ त्रित्वज्ञानकालेऽनुमितिरापद्यते तत्क्षणकाले वा नाद्यः तदानीं महत्त्रित्वग्रहरूपप्रतिबंधकसत्वेनानुमित्सापादनासंभवात् नांत्यः इष्टापत्तेः

2 । यद्वा तद्वारणाय कारणतावच्छेदककोटौ व्यापकांशे हत्रिमत्वमेव निवेशनीयं न तु सामानाधिकरण्यमपि गौरवात् वस्तुतस्तु स्वव्या।
प्यवृत्तिकपिसंयोगादीनां व्यापकत्वोपपत्तये हेत्वधिकरणवृत्त्यभावे निरुक्तप्रतियोगित्वे व्यधिकरणं पदं न निवेश्यते किं तु व्याप्यवृत्तित्वं वा।
त्रित्वस्य प्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधावच्छिन्नत्वं वा निवेश्यते एवं च न गगनाद्यवृत्तिसाध्यकानुमित्सापत्तिसंभावना।
पीध्येयं ननु तथापि व्यापकतावगाहिज्ञानहेतुतामते हेतौ साध्यसामानाधिकरण्यसंदेहदशायां तद्व्यतिरेकनिर्णयदशायां चानुमि
त्सापत्तिरिति वाच्यं तादृशसंशयदशायामनुमित्सादेः इष्टापत्तेः तादृशव्यतिरेकनिर्णयदशायां हेतौ पक्षधर्मताज्ञानविरहे हेतौ पक्षीय
त्वावगाहिव्यापकतानिर्णयरूपपरामर्शाभावादेवानुमित्सापत्तेरभावात् हेतौ पक्षधर्मताज्ञानसत्वे च साध्यसमानाधिकरणधर्मांतर
ग्रहवत्तादृशव्यतिरेकनिर्णयस्यापि चानुमितौ विरोधित्वस्य नव्याप्यावद्रूपकतया विरोधिसत्वेनानुमित्सापादनासंभवात् तथा तादृशव्य राम०
तिरेकनिर्णयस्यानुमितौ विरोधित्वानभ्युपगमे तु ममापि तदानीमनुमित्साविष्टापत्तेः ननु भवन्मते वह्निसामानाधिकरण्याभावप्रकारक २

धूमविशेष्यकमानसशाब्दबोधादौ पर्वतपक्षकवह्न्याद्यनुमितिसामग्र्याः अप्रतिबंधकत्वस्याधिकस्य कल्पनीयतया गौरवं मन्मते तु
अनुमितिसामग्रीकाले व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुमत्तापरामर्शस्यावश्यकतया बाधनिर्णयसद्भावात्तत्र प्रतिबंधक
तायाः स्फुटत्वात् नैव तदानीमुपदर्शितोपनीतभानाद्यनुत्पादोपपत्तेस्तादृशसामग्रीप्रतिबंधकतायास्तत्राकल्पनात् लाघवं न च व्याप
कताज्ञानहेतुतावादिमीमांसकमते एकदा ज्ञानद्वययौगपद्याभ्युपगमे न कुत्रापि ज्ञानसामग्र्याः प्रतिबंधकत्वकल्पनमेव नास्तीति वाच्यं
प्रत्यक्षादौ भिन्नविषयकानुमितिसामग्र्याः प्रतिबंधकत्वस्य प्राभाकराणामपि संमतत्वेन अन्येषां तदंगीकारस्य सुतरां सिद्धत्वात् अन्य
था वह्निव्याप्यो धूमो धूमवांश्च पर्वत इत्यादिज्ञानसत्वे अनुमितिसामग्र्याः सत्त्वेन तदुत्तरं प्रत्यक्षात्मकविशिष्टपरामर्शस्यासंभवेन नैय्या
यिकमते अनुमितिविशिष्टपरामर्शयोः कार्यकारणभावे व्यभिचारप्रदर्शकस्य प्रत्यक्षसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वादनुमिति
रेवोत्पद्यते न तु व्याप्त्याभेदप्रत्यक्षमिति परामर्शग्रंथोपज्ञानहेतुतावादिमीमांसकमतोपन्यासस्य मणिकारलिखितस्यानुपपत्तेः
तस्मान्मीमांसकमतेपि प्रत्यक्षादौ भिन्नविषयकानुमितिसामग्र्याः प्रतिबंधकत्वस्यावश्यकत्वेनोपदर्शितमहानसादावनुमितिसामग्र्या

३ ःप्रतिबध्यप्रतिबंधकभावकल्पनप्रयुक्तंगौरवं दुष्परिहरमेवेति चेन्न ।मन्मते तथाविधकिंचित्प्रतिबध्यप्रतिबंधकभावाधिक्येपि पर्वतःपर्वती
पधूमव्यापकवह्निसमानाधिकरणाभावाप्य विशिष्टवह्न्यभाववत्सर्वतज्ज्ञानकालीनघटादिमानितिसमवेतानुमितिसामग्र्याः अनेनघ
3 टपटादिविषयकप्रत्यक्षप्रतिप्रतिबंधकत्वाकल्पनेन लाघवस्यानपायात् तदानीं मन्मते पर्वतो वह्निमानित्यनुमितिसामग्र्याः अन्य
त्वल्लक्षघटपटादिप्रत्यक्षप्रतिबंधकतायाआवश्यकत्वेनैव घटपटादिप्रत्यक्षापत्तिवारणसंभवेन तत्रातिरिक्तप्रतिबध्यप्रतिबं
धकाभावाकल्पनात् मन्मते तु तत्रातिरिक्तप्रतिबध्यप्रतिबधकभावकल्पनमावश्यकमेव तदानीं भवन्मते पर्वतो वह्निमानित्यनु
मितिसामग्र्या अनावश्यकत्वेन लक्षसेन निर्वाहासंभवादिति भवन्मतेपि उपदर्शितप्रतिबधकताकल्पनप्रयुक्तगौरवं दुष्परिहरमेव किं
च भवन्मतेन एव हेतुतावच्छेदकभेदेन परामर्शहेतुतायाम् अनुमितिसामग्रीप्रतिबंधकतायाश्च बाहुल्याद्गौरवं तथाहि भवन्मते धूमत्वाव
च्छिन्नविषयतानिरूपितव्यापकत्वत्वावच्छिन्नविषयतानिरूपितवह्नित्वावच्छिन्नविषयतानिरूपितसामानाधिकरण्यत्वावच्छिन्नविष राम०
यतानिरूपितधूमत्वावच्छिन्नविषयतानिरूपितपर्वतत्वाद्यवच्छिन्नविषयताशालिनिर्णयत्वेन आलोकत्वावच्छिन्नविषयतानिरूपितव्याप ३

कत्वत्वावच्छिन्नविषयतानिरूपितवह्नित्वावच्छिन्नविषयतानिरूपितसामानाधिकरण्यत्वावच्छिन्नविषयतानिरूपितालोकत्वावच्छिन्न
विषयतानिरूपितपर्वतत्वावच्छिन्नविषयताशालिनिर्णयत्वादिना च धूमालोकादिलिङ्गकपरामर्शानां विशिष्यैतत्तल्लिङ्गका
नुमितिहेतुत्वं सिद्ध्यभावादिविशिष्टतादृशनिर्णयत्वादिनाऽनुमितिसामग्र्याः घटपटादिप्रत्यक्षप्रतिबन्धकत्वं च वाच्यं नव्यमते किं
चिद्धर्मावच्छिन्नविषयतात्वेनैव हेतुविषयतानां निवेश इति वाच्यं तथा सति आलोकव्यापकवह्निसमानाधिकरणधूमवान्पर्वत इ
त्यादिनिर्णयकाले वह्न्यादिविधेयकानुमित्यापत्तेः तादृशनिर्णयसत्वे भिन्नविषयकप्रत्यक्षाद्यनुत्पत्त्यापत्तेश्च एवं च विशिष्यैतत्तदालो
कत्वावच्छिन्नविषयतानिवेशाद्भवन्मते हेतुतावच्छेदकभेदेनानन्तकार्यकारणभावकल्पनेनानन्तानुमितिसामग्रीप्रतिबन्धकताकल्प
नेच महागौरवं अस्मन्मते च व्यापकताज्ञानमात्रस्यानुमितिहेतुत्वादनुमितिजनकतावच्छेदककोटौ हेतुविषयतानां सकृदेव निवेशेन त
त्र किंचिद्धर्मावच्छिन्नविषयतात्वेन तासां निवेशे बाधकाभावात् हेतुतावच्छेदकभेदेन कार्यकारणभावादिबाहुल्यमिति नव्यव्यापक
सामानाधिकरण्यज्ञानहेतुतामतेऽपि स्वावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्ननिरूपितसामानाधिकरण्यावच्छिन्नत्वस्याव

५ छिन्नत्वोभयसंबंधेन किंचिद्धर्मविशिष्टप्रकारतात्वेन निखिलहेतुप्रकारताः अनुगमय्य तादृशप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशे।
ष्यताशालिनिर्णायत्वं न हेतुत्वमुच्यत इति नैतन्मतेपि हेतुतावच्छेदकभेदेन कार्यकारणभावादिवाहुल्यमिति वाच्यं नीलधूमव्यापकव
ह्निसमानाधिकरणधूमवान्पर्वत इति ज्ञानादप्युत्पत्तिप्रसंगात् तत्र नीलधूमत्वस्य धूमत्वानतिरिक्तत्वेन पर्वततावच्छिन्नविशेष्यता
निरूपितधूमनिष्ठप्रकारतायां धूमत्वस्य प्रथमसंबंधसत्त्वात् धूमत्वस्य तादृशप्रकारतावच्छेदकत्वेन द्वितीयसंबंधसत्त्वाच्च यदि च सा
ध्यतावच्छेदके वा स्वत्वावच्छिन्नव्यापकतावच्छेदकत्वनिवेशे इंधनव्यापकवह्निसमानाधिकरणेंधनवान्पर्वत इत्यादिज्ञानादनु
मित्यनुपपत्तिस्तत्र वह्नित्वे इंधनव्यापकतावच्छेदकत्वाभावादतस्तद्वारणाय स्वत्वावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्न
निरूपितसामानाधिकरण्यावच्छिन्नत्वे सनेन स्वनिष्ठावच्छेदकतानिरूपितहेतुनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेद
कतानिरूपिताधेयत्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितावच्छेद राप०
कत्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितसाध्यनिष्ठावच्छेदक ५

तानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपिताधेयत्वनिष्ठावच्छेदकतानिरूपितत्वं विवक्षणीयं तत्र च स्वनिष्ठावच्छेदकतायां स्वनि
रूपकावच्छेदकतानिरूपितत्वसंबंधेन किंचिन्निष्ठावच्छेदकताविशिष्टान्यत्वं निवेशनीयमिति तेन नीलधूमव्यापकवह्निसमानाधिकरण
धूमवान्पर्वत इत्यादिज्ञानादनुमित्यापत्तिस्तत्र धूमत्वनिष्ठावच्छेदकताया निरूपकसंबंधेन नीलत्वनिष्ठावच्छेदकताविशिष्टत्वेन तदन्य
त्वाभावादिति विभाव्यं नेतदानीलधूमव्यापकवह्निसमानाधिकरणनीलधूमवान्पर्वत इत्यादिज्ञानासंग्रहप्रसंगः तस्य रूपांतरेण स्वातंत्र्येण
कारणत्वांगीकारे किंचिद्विशेषणविशिष्टाविशिष्टहेतुभेदेन भवन्मते कार्यकारणभावभेदो दुरुद्धर एव नव निश्चूपत्तनिर्वचनाघटितो धेनो
भयमतेपि कार्यकारणभावभेदस्यावश्यकत्वमिति वाच्यं तथाप्यनेनानुमितिसामग्रीप्रतिबंधकतावच्छेदककोटौ साध्यसामानाधिकरण्याव
गाहित्वस्य नाद्दशामाणपत्ता नोभावस्य वा निवेशेन व्यापकताज्ञानहेतुतावादिमते एव लाघवसंभवादिति वदंति तन्न सत् अभावप्रत्येप्र
तियोग्यंशे याद्दशो धर्मः प्रकारविधया भासते तद्धर्मावच्छिन्नप्रतियोगिताकत्वसंबंधेन वह्नित्योगिनोऽभावांशे भानमिति नियमेन धूमव्याप
कवह्निसमानाधिकरणधूमवान्पर्वत इत्यादिज्ञानेऽपरदर्शितरीत्या धूमाद्यंशे पर्वतीयत्वादेरूपलक्षणविधयाभानासंभवेन व्यापकताज्ञान

५ हेतुतावादिमते तादृशज्ञानादेस्तु मिथ्यपलापस्य दुरुद्धरत्वात् नच तादृशनियमे मानाभाव इति वाच्यं प्रतियोगिनोः भावांशे निरुक्तसंबंधे
न भानस्यानुभवसिद्धत्वात्तादृशनियमांगीकारस्यावश्यकत्वात् अन्यथा व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्याप्यतिरिक्त
5 स्यासिद्ध्यापत्तेः नहि तत्र तथाविधनियमादन्यदृष्टतरं किंचिद्बाधकमस्ति नचेष्टापत्तिः तादृशातिरिक्ताभावकल्पने गौरवप्रसंगेन
तथा वक्तुमशक्यत्वात् ननु प्रतियोग्यंशे प्रकारीभूतो यो धर्मस्तद्धर्मस्य न प्रतियोगितावच्छेदकत्वविधया भानमिति सैव नियमः स्वीक्रिय
तेनावैते व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाववारणसंभवात् ननु सर्वेपि दर्शितनियमोपि मानाभावात् अत एव लघुसमनियत
गुरुधर्मावच्छिन्नसाध्यकव्यभिचारिणि प्रतिव्याप्तिवारणाय स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वमिति पारिभाषिकावच्छेदक
त्वघटितव्याप्तिलक्षणे स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकं यद्यत्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वस्य स्व
नवच्छेदकत्वात्तेन विवक्षणमप्रदर्शकः प्रतियोगितास्वविशिष्ट्योपादेया इति व्याप्तिसिद्धांतलक्षणीयदीधितिग्रंथोपि संगच्छते अन्यथा राम०
तत्रापि स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वघटकानां पदार्थानामुपलक्षणविधया निवेशासंभवेन तादृशग्रंथस्यासंगतत्वाप ५

न्नेः वस्तुतस्तु प्रतियोग्यंशे ऽप्रकारीभूतहृत्वादिनियमे ऽपि मानाभावः प्रामाणिकगौरवस्यादोषत्वात् घाऽस्तु भवतु वलापात्तातिरिक्तव्यधिकरण
धर्मावच्छिन्नप्रतियोगिताकाभावांगीकारे बाधकाभावात् अत एव परिंपुनरानुभविको लोकानां स्वारसवाही घटत्वेन पटो नास्तीत्यादिरनु
भवो न तदा तादृशाभावनिवारणं गीर्वाणगुरुणापि शक्यमित्युक्तं दीधितिकारेणापि एवं च धूममव्यापकवह्निसमानाधिकरणधूमवत्त्वेन
ह्रदादिज्ञाने धूमाद्यंशे उपलक्षणविधया पर्वतीयत्वभाने बाधकाभावेन तादृशज्ञानादनुमित्यपलापकरणासंभवेन व्यापकताज्ञानहेतु
तावादिमते तत्कोपि दोषः इति चेदत्र ब्रूमः परिव्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुमत्तावगाहिपरामर्शस्य चेत्कारणत्वं म
गीक्रियते तत्तदेवोपदर्शितरीत्या गौरवस्य प्रसंगेन लाघवात् व्यापकतावगाहि पर्वतीयधूमव्यापको वह्निरित्याद्याकारकपरामर्शस्यैव हेतु
त्वमस्त्वेतत्तदेव न किंतु साध्याभाववदवृत्तित्वरूपव्याप्तिविशिष्टहेतुमत्तावगाहिपरामर्शस्यैव हेतुतास्तीक्रियते तत्र च न किमपि गौरवं सं
भवति प्रकृते व्यापकतापेक्षया साध्याभाववदवृत्तित्वस्य लघुशरीरतया लाघवेन तदवगाहिपरामर्शस्यैव हेतुत्वौचित्यादिति विवदंति न
न्वेतन्मते केवलान्वयिवाच्यत्वादिसाध्यकानुमित्यनुपपत्तिः तत्र वाच्यत्वादिरूपसाध्याभावाप्रसिद्ध्या साध्याभाववदवृत्तित्वरूपव्याप्त्य

६ वगाहिपरामर्शासंभवात्. न चैवं तत्र वस्तुगत्यासाध्याभावाप्रसिद्धावपि अभावांशे प्रतियोगितासंबंधेन वाच्यत्वादिरूपसाध्यावगाहिनाभ्रमा
त्मकपरामर्शस्य संभवेनानुपपत्तिरिति वाच्यं न त्वाप्यभावो न वाच्यत्वीयइत्याद्याकारकप्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकवाच्य
त्वाद्यभावप्रकारकाभावविशेष्यकबाधनिर्णयरूपविशेषदर्शनकाले भ्रमात्मकपरामर्शस्याप्यसंभवेनानुपपत्तितादवस्थ्यात् अथैवं
कंधर्मं धर्मितविच्छेदकीभूत्यविरुद्धभावाभावोभयप्रकारकनिर्णयानभ्युपगमेनाभावत्वं धर्मितावच्छेदकीभूतवाच्यत्ववाच्यत्वोभा
वोभयप्रकारकस्याभावो न वाच्यत्वीयइत्याकारकनिर्णयस्यासंभवेनोपदर्शितानुपपत्त्यसंभवः तथाहि अभावत्वं धर्मितावच्छेदकी
भूतप्रतियोगितासंबंधेन वाच्यत्वादिमान प्रतिबंधिकाऽभावत्वावच्छेदेन प्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभा
वप्रकारकनिश्चयात्मिकाबुद्धिरेव तस्याश्चासंभवः यतस्तस्या अभावत्वावच्छिन्ने प्रतियोगितासंबंधावच्छिन्नप्रतियोगितासंबंधेन
वाच्यत्वादिविशिष्टैः भावैर्भासमानैः भावत्वविशिष्टविशेषणतया प्रतियोगितासंबंधावच्छिन्नप्रतियोगितासंबंधेन वाच्यत्वादिमान रामः
भावस्यैकैकस्य च भानेन संभवति तद्भानस्य विरोधिनोऽभावत्वावच्छेदेन स्वात्मकस्य प्रतियोगिसंबंधावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभा ६

वनिश्चयस्यकार्यकालेसत्वात्समानप्रकारकत्वेनैवज्ञानस्यप्रतिबंधकत्वपातस्यभिन्नधर्मिकत्वेपिप्रतिबंधकत्वात् नचभूतला
दौशुद्धसंयोगसंबंधावच्छिन्नप्रतियोगिताकघटाद्यभावनिश्चयसत्वेपिसंयुक्तसंयोगादिरूपपरंपरासंबंधेनघटादिप्रकारक
ज्ञानेनासत्याशुद्धतत्संसर्गकतद्विशिष्टबुद्धावेवतत्संबंधावच्छिन्नप्रतियोगिताकतदभावनिश्चयस्यप्रतिबंधकत्वस्वीकरणी
यएवंवाभावत्वावच्छेदेनप्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकवाच्यत्वाभावनिश्चयकालेपिच्चभावत्वविशिष्टप्रति
योगितासंबंधावच्छिन्नप्रतियोगिताकसंबंधेनवाच्यत्वादिमानेबाधकाभावइतिवाच्यं तत्संबंधावच्छिन्नप्रतियोगिताकतदभा
वनिश्चयप्रतिबध्यतावच्छेदककोटौशुद्धतत्संसर्गकत्वनिवेशेभूतलादौसंयोगादिसंबंधावच्छिन्नप्रतियोगिताकघटाद्यभावनिश्च
यदशायांभूतलत्वव्यापकत्वादिविशिष्टसंयोगादिसंबंधेनघटादिविशिष्टबुद्ध्यापत्तेः नचोक्तदोषतद्धर्मावच्छिन्नविशेष्यतानिरू
पिततत्संबंधीयसांसर्गिकविषयतानिरूपिततद्धर्मावच्छिन्नप्रकारतायाएवतद्धर्मावच्छिन्नविशेष्यकतत्संबंधावच्छिन्नतद्धर्मावच्छिन्न
प्रतियोगिताकाभावनिश्चयप्रतिबध्यतावच्छेदकत्वोपगमात्संयुक्तसंयोगादिपरंपरासंबंधस्थलेचभूतलत्वाद्यवच्छिन्नविशेष्यता

८ निरूपितसंयोगादिसांसर्गिकविषयतानिरूपितत्वस्य संयुक्तत्वानिष्ठसांसर्गिकविषयतायामेव सत्वेन घटत्वाद्यवच्छिन्नप्रकारतायाम्
सत्वेनानुपपत्त्यभावादिति चेन्न अभावांशे प्रतियोगितासंबंधेन वाच्यत्वादिरूपप्रतियोगिज्ञानप्रतिबंधकस्याभावेन वाच्यत्वीयप्रकारता
द्याकारकनिश्चयस्योक्तयुक्त्याऽसंभवेपि अभावः प्रतियोगितासंबंधेन वाच्यत्वाद्यवत्त्वाभिन्न इत्याद्याकारकस्य तत्प्रतिबंधकनिश्चयस्य
संभवात् तस्याभाववत्त्वविशिष्टे प्रतियोगितासंबंधेन वाच्यत्वाद्यप्रकारकत्वादिति चेन्मैवं उक्तविशेषदर्शनकाले केवलान्वयिवाच्यत्वा
दिसाध्यकानुमितेरनभ्युपगमात् अभाववत्त्वावच्छेदेन हेतुसामानाधिकरण्याभावग्रहदशायामनुमितेरनभ्युपगमस्य व्यापकत्वावगाहि
परामर्शहेतुतावादिनामप्यावश्यकत्वात्पक्षचिन्तकलापल्लवसमसाम्यात् यत्तु प्रतियोगितासंबंधेन सत्ताध्वंसीयोपलब्धद्वारेहेतित्वरूपस्या
प्यवगाहिपरामर्शेणवानुमितिरिति हेतुर्न तत्र अभाववत्तांशस्यापि निवेशो गौरवान्मानाभावाच्च एवं चोक्तविशेषदर्शनकालेपि वाच्यत्वा
शे निर्धर्मितावच्छेदकस्य निरुक्तव्याप्यवगाहिपरामर्शासंभवेन केवलान्वयिवाच्यत्वादिसाध्यकानुमितेरुत्पत्तौ न किंचिद्बाधकमि राम०
ति तदसत् तद्धर्मावच्छिन्नविशेष्यकस्य तत्संबंधावच्छिन्नत्वाद्यप्रतिताप्रकारकस्य तत्संबंधाभावप्रकारकस्य च निर्णयस्य तेन संबंधेन तद्धर्मा ८

वच्छिन्नप्रकारकनिर्धर्मितावच्छेदकज्ञानेप्रत्यपिप्रतिबंधकतयाप्रतियोगितयावाच्यत्वमवृत्तिवाच्यत्वमप्रतियोगीत्यादिनिर्णयकालेऽप्रतियो
गितयावाच्यत्वादिप्रकारकनिर्धर्मितावच्छेदकज्ञानस्याप्यसंभवेनमदुक्तरीत्यैवानुसरणीयत्वात्· नन्वेकविशेषदर्शनशून्यकालेऽपिके
वलान्वयिवाच्यत्वादिसाध्यकानुमित्यनुपपत्तिः नचतदानीमभावांशेप्रतियोगितयावाच्यत्वादिप्रकारकभ्रमात्मकपरामर्शादनु
मितिः संभवतीत्युक्तमेवेतिवाच्यं साध्यतावच्छेदकातिरिक्तधर्मावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकसंबंधातिरिक्तसंबंधावच्छिन्न
प्रतियोगिताकंचसाध्याभावमादायासंभववारणायसाध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकमादाया
संभववारणायसाध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिकसाध्याभावेसैवसाध्याभाववद्वृत्तित्वरूपव्या
प्तिघटकतयावाच्यत्वत्वाद्यवच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगिताप्रसिद्ध्यातादृशभ्रमानुपपत्तेः नचप्रतियोगितांशेवाच्यत्वत्वाद्य
वच्छिन्नत्वस्वरूपसंबंधावच्छिन्नत्वयोरेवाप्रसिद्धेस्तादृशभ्रमसंभवइतिवाच्यं तेषांसंबंधघटकतयातदभाववद्विशेष्यकत्वतत्प्रकारकत्वघटि
ततद्भ्रमत्वानुपपत्तेः नचतेनरूपेणप्रतियोगिताप्रकारकएवात्रभ्रमोऽपिवह्नितेन [illegible]नुतदवच्छिन्नप्रतियोगितासंसर्गकइतिवाच्यं लाघवा

८ त्वप्रतियोगितासंसर्गकज्ञानस्यैवानुमितिहेतुतया तत्प्रकारकज्ञानस्यानपेक्षितत्वादिति चेन्न लाघवेन स्वावच्छिन्नसाध्यतावच्छेदकसंबंधाव
8 च्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यतावच्छेदकविशिष्टाभावस्यैव साध्याभाववद्वृत्तित्वरूपव्याप्तिघटकतया घटत्वप्रकारकप्रमाविशे
ष्यत्वत्वादेः प्रसिद्धेन स्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वरूपव्यधिकरणसंबंधेन वाच्यत्वत्वादेरभावांशे भ्रमात्मकपरामर्श
स्यासंभवेनानुपपत्त्यभावात् अत एव साध्याभाववद्वृत्तित्वरूपव्याप्त्यवगाहिपरामर्शस्यानुमितिहेतुत्वे विशिष्टस्यानतिरिक्ततयाऽव्याप्यत्वाभा
ववद्वृत्तित्वस्य विशिष्टसत्त्वेऽसत्त्वेन तादृशव्याप्त्यवगाहिपरामर्शासंभवेन द्रव्यत्वसाध्यकविशिष्टसत्तालिंगकानुमित्यनुपपत्तिः एवं जाति
मान्सत्वादित्यादावपि जात्यभाववति सामान्यादौ हेतुतावच्छेदकसमवायादिसंबंधेन वृत्तित्वस्याप्रसिद्धत्वेन तादृशव्याप्त्यवगाहिपरामर्श
स्यासंभवेन जात्यादिसाध्यकसत्तालिंगकानुमित्यनुपपत्तिरित्यपि प्रत्युक्तं तत्रापि तादृशव्याप्त्यवगाहिभ्रमात्मकपरामर्शसंभवे केऽपि भ्रमा
त्मकपरामर्शादेवानुमित्युपगमेन तत्र हि विशेषदर्शनकाले चानुमितेरनभ्युपगमेनानुपपत्त्यभावात् अत एव केवलान्वयिग्रन्थे उपदर्शितेन प्र एम०
पि केवलान्वयिनः सरणिमिति दीधितिकारेणाप्युक्तं एतेन साध्याभाववद्वृत्तित्वरूपव्याप्त्यवगाहिपरामर्शो नानुमितिहेतुः तथा सति परार्थ्यी ८

नुमानस्थले योयो धूमवान्स स वह्निमानित्याद्युदाहरणवाक्यप्रयोगानुपपत्तेः तथाहि तादृशवाक्याद्धूमादिसमानाधिकरणाभावप्रतियोगि
तानवच्छेदकत्वरूपव्यापकतावच्छेदकत्वमेव वह्नित्वादौ प्रतीयते न तु धूमादौ वह्नित्वाद्यवच्छिन्नाभाववदवृत्तित्वं यद्यदभिधेयं तत्प्रमेयमि
त्याद्युदाहरणवाक्ये प्रमेयत्वत्वाद्यवच्छिन्नाभावाप्रसिद्ध्या तादृशप्रतीत्यसंभवात् एवं चोदाहरणवाक्ये व्याप्त्यनुमितिकारणानुपयोगित्वेन तत्
प्रयोगस्यैवार्थक्यापत्तिरिति व्यापकत्वावगाहिपरामर्शहेतुत्वमेव समीचीनं अथ तादृशवाक्यान्निरुक्तव्यापकतावच्छेदकत्वप्रती
तिः तस्य पदार्थत्वेन प्रकारतया भानासंभवात् न च यत्तदोस्तत्र यत्तद्रूपवीप्सार्थस्य निरुक्तव्यापकतावच्छेदकत्वस्य वह्नित्वादावन्वय
तया प्रतीतिरुपपद्यत इति वाच्यं नामार्थयोः भेदेनान्वयस्याव्युत्पन्नत्वविरुद्धतया तथान्वयासंभवात् न च वह्न्यादिपदेन शक्त्योपस्था
पिते वह्नित्वादौ लक्षणयोपस्थापितस्य निरुक्तव्यापकतावच्छेदकत्वस्यान्वयात्तथा प्रतीतिः नामद्वयार्थयोरेव भेदेनान्वयस्याव्युत्पन्नत्वा
विरुद्धतया एकनामार्थयोर्भेदेनान्वयेपि त्वस्याभावात् युगपद्वृत्तिविरोधस्य चाभ्युपगमादिति वाच्यं गंगायां मीनादिवाक्यात्संयोगेन प्र
वाहवत्तीरमत्स्याद्यनुभवस्य सर्वानुभवविरुद्धतया एकपदवृत्तिद्वयोपस्थाप्यार्थयोः परस्परमन्वयस्याव्युत्पन्नत्वविरुद्धतया तथान्वयासं

१५ भवादिति चेन्न मुख्यविशेष्यस्य नामार्थयोरेवाभेदेनान्वयस्य व्युत्पत्तिविरुद्धतया तथान्वयसंभवेन वीप्सार्थस्य व्यापकतावच्छेदकैक्येवाभेदेन
वह्नित्वादावन्वयसंभवेन वा तथा प्रतीत्युपपत्तेः वस्तुतस्तु व्यापकतावच्छेदकत्वं न वीप्सार्थः गौरवात् किंतु यो यो धूमवान्स वह्निमानित्याद्यु
दाहरणवाक्यस्य वीप्सादिसमभिव्याहारेणोद्देश्यतावच्छेदकधूमादिव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नवत्प्रतियोगिकत्वविशिष्टाभेदसं
बंधेन वह्निमदादिप्रकारकधूमवदादिविशेष्यकबोधजनकत्वाभ्युपगमेन तथा प्रतीत्युपपत्तेः यदि च यो यो धूमवान्स वह्निमानित्यादिवाक्य
स्याप्रामाण्यापत्तिरोधेन वह्न्यादिव्यापकतावच्छेदकधूमत्वाद्यवच्छिन्नवत्प्रतियोगिकत्वविशिष्टाभेदसंबंधेन धूमवदादिप्रकारकबोधजन
कत्वमेव स्वीकरणीयं एवं च यो यो वह्निमान्स न धूमवानित्यादिनञ्घटितवाक्यस्याप्रामाण्यापत्तिः तस्य वह्न्यादिव्यापकताव
च्छेदकधूमत्वादेरप्रसिद्ध्यात् तद्घटितनिरुक्तसंबंधावच्छिन्नप्रतियोगिताकाभावबोधकत्वासंभवादिति विभाव्यते तेन तथापि न क्षतिः यो
यो धूमवान्स वह्निमानित्यादिवाक्ये स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेद रम०
कताकभेदवत्त्वपर्यवसितस्य व्यापकतावच्छेदकत्वसंबंधेन धूमादिविशिष्टो यो धर्मस्तदवच्छिन्नप्रतियोगिताकत्वसंबंधेन मतुबर्थघटक ९

संयोगादिसंबंधेनतुधूमकृत्यर्थस्यवह्नित्वविशिष्टादेरन्वयोपगमेनतादृशशक्तीतिनिर्वाहात् योयोवह्निमान्सधूमवानित्यादौचयधूमत्वा
दौवह्न्यादेर्निरूपकव्यापकतावच्छेदकत्वसंबंधेनासत्त्वेननिरूपकव्यापकतावच्छेदकत्वसंबंधेनवह्न्यादिविशिष्टवह्नित्वाद्यवच्छिन्नप्रति
योगिताकत्वेवह्नित्वादिविशिष्टस्यैवसंबंधत्वेनधूमत्वादिविशिष्टस्यासंबंधतयातादृशव्यधिकरणसंबंधेनमत्वर्थघटकसंबंधेधूम
त्वादिविशिष्टस्याभानादप्रामाण्यं नञ्पदघटिततादृशवाक्यस्यचमत्वर्थघटकसंयोगादिसंबंधेतादृशव्यधिकरणसंबंधावच्छिन्न
प्रतियोगिताकधूमत्वादिविशिष्टस्याभावबोधकत्वात्प्रामाण्यमितिनकिंचिदसमंजसमभिन्नमपिपरास्तं पक्षदृष्टविशेषंतत्समेयमि।
त्याद्युदाहरणप्रकारस्युकरीत्याभ्रमात्मकसाध्याभाववदवृत्तित्वरूपव्याप्यत्वावगाहिबोधसंभवात् विशेषदर्शनदशायांचानुमितेर
नभ्युपगमेनतादृशबोधाभावेपिक्षतिविरहात् नचतथापिस्वहृत्तिगगनादौवह्न्याद्यभाववदवृत्तित्वरूपव्याप्तिसत्त्वेनगगनादिलिंगकव
ह्न्यादिविधेयकानुमित्यापत्तिरितिवाच्यं गगनमहत्त्वीत्याकारकविशेषदर्शनकालेतत्रपक्षधर्मताज्ञानासंभवादेवानुमित्यसंभवात् नचा
वृत्तित्वप्रकारकग्रहस्यवृत्तित्वप्रकारकग्रहंप्रत्येवयथात्याभावावगाहित्वयाविरोधित्वेनगगनमहत्त्वीत्याकारकविशेषदर्शनकालेवह्न्यभावव

१० वह्निगगनवान्पर्वतइत्याद्याकारकपक्षविशेष्यकगगनप्रकारकपरामर्शेऽसत्त्वे बाधकाभावेन तादृशानुमित्यापादनं तु दुर्वारमेवेति वाच्यं
तदानीं तादृशानुमित्यभावस्य प्रामाणिकत्वे साध्याभाववद्वृत्तित्वविशिष्टवह्निमत्त्वस्यैव व्याप्तित्वांगीकारेण तादृशव्याप्तिग्रहस्य च तादृशमित्वग्र
हकाले कथमप्यसंभवात् वस्तुतस्तु तत्प्रकारकग्रहं प्रति तदभावकग्रहस्य प्रतिबंधकत्वमवश्यमंगीकार्यं तथा सति वह्निः हृद्वह्निरित्याद्या
कारकविशेषणतावच्छेदकप्रकारकनिर्णयघटितायाः इच्छाविशिष्टाया अवह्निर्वह्निमान्पर्वतइत्याद्याकारकविशिष्टवैशिष्ट्यावगाहि
प्रमत्वसामग्र्याः पर्वतो वह्निमानित्याद्यनुमितिं प्रति प्रतिबंधकत्वाकल्पनेन लाघवात्तादृशसामग्रीकाले वह्निः हृद्वह्निरित्याद्याकारक
विशेषणतावच्छेदकप्रकारकनिर्णयस्यावश्यकतया तस्य च तादृशानुमितौ प्रतिबंधकत्वस्य क्लृप्तत्वात्तत्र तदानीं तादृशानुमिति
वारणसंभवात् तथा च गगनवह्निमानित्याकारकविशेषदर्शनकापक्षधर्मताज्ञानासंभवात्स्वदेवानुमितिः उक्तविशेषदर्शनशून्यकाले
च निरुक्तव्याप्तिज्ञानसत्त्वेऽनुमिताविष्टापत्तिरेवेति व्याप्तिलक्षणे वह्निमत्त्वं न निवेशनीयमिति दिक् ननु व्यापकसामानाधिकरण्यपद रा०म०
पद्व्याप्यस्यावगाहिपरामर्शो हेतुता मते अभावानहेतुसमानाधिकरणः प्रतियोगितानाभावीयाः इत्याद्याकारकोपनीतभानशाब्दबोधादौ पर्वतेन १०

पक्षकवह्न्याद्यनुमितिसामग्र्या अतिरिक्तप्रतिबंधकत्वाकल्पनेन लाघवं तादृशसामग्रीकाले व्यापकसामानाधिकरण्यरूपव्याप्तिविशि
ष्टहेतुमत्तावगाहिपरामर्शस्यावश्यकतया तस्य च बाधमुद्रया तत्र प्रतिबंधकत्वस्य क्लृप्तत्वात् तत एव तद्दशानादृशोपनीतभानाद्यनुम
तेः साध्याभाववद्वृत्तित्वरूपव्याप्त्यवगाहिपरामर्शकारणतामते तु तद्दशानी वह्न्यभाववद्वृत्तिमात्रसर्वतः साध्याकारकनिर्णयस्य सत्त्वे
न तस्य तादृशोपनीतभानादौ प्रतिबंधकत्वस्य क्लृप्तत्वेन यानुमितिसामग्रीकाले तथाविधोपनीतभानादिवारणाय तत्तु तादृशसामग्र्याः
प्रतिबंधकत्वकल्पनेन महागौरवं न च साध्याभाववद्वृत्तित्वरूपव्याप्त्यवगाहिपरामर्शहेतुतामतेपि अभावेन साध्यभ्रमस्याकरस्योप
नीतभानस्य शाब्दबोधादेरनुमितिसामग्र्याः प्रतिबंधकत्वाकल्पनेन लाघवं मत्स्येवेति वाच्यं पक्षे गुरुशरीरव्याप्त्यवगाहिज्ञानप्रतिब
ध्यज्ञानानां बहुतया व्यापकसामानाधिकरण्यरूपव्याप्त्यवगाहिपरामर्शहेतुतामते वरं लघुस्थले लघुसामग्री प्रतिबंधकत्वाकल्पनप्रयु
क्तलाघवं लघुशरीरव्याप्त्यवगाहिज्ञानप्रतिबध्यज्ञानानां मल्पतया साध्याभाववद्वृत्तित्वरूपव्याप्त्यवगाहिपरामर्शहेतुतामते अल्प
स्थले तथेति व्यापकसामानाधिकरण्यरूपव्याप्तेः शरीरगौरवमेव लाघवसपारकमिति चेत् व्यापकसामानाधिकरण्यरूपव्याप्त्यवगा

११ हिपरामर्शहेतुतामतेपिघटाद्युपनीतभानाहार्यकार्तुमितिसामग्र्याः प्रतिबंधकत्वेवश्यकल्पनीयेनतैवघटादिविषयमनिवेश्यलौकिका
न्यप्रत्यक्षत्वादेरेवप्रतिबध्यतावच्छेदकत्वोपगमेनाभावेन हेतुसमानाधिकरणत्वाद्युपनीतभानादेरपितादृशप्रतिबध्यतावच्छेदका
कोतत्तथा। साध्याभाववद्वृत्तित्वरूपव्याप्यवगाहिपरामर्शहेतुतामतेपि स्वकत्वप्रतिबंधकतयैवनिर्वाहेणोक्तसामग्रीप्रतिबंधकता
कल्पनाधिक्याभावात् नचघटाद्युपनीतभानेनापत्तामित्यादिविषयमिश्रितेरछानामुत्तेजकत्वानुरोधेनविशिष्यघटाद्युपनीत
भानत्वादिकमेवोक्तसामग्रीप्रतिबध्यतावच्छेदकंवाच्यंतथाचकथमेकप्रतिबंधकत्वेनैवोपपत्तिरितिवाच्यं स्वाव्यवहितक्षणोत्पत्ति
कत्वसंबंधेनोक्तसामग्रीविशिष्टप्रत्यक्षत्वस्योक्तसामग्रीप्रतिबध्यतावच्छेदकोटौनि वेशेनैवेछाकालीनज्ञानेव्यभिचाराभावेना
क्तसामग्रीप्रतिबंधकतायामिछायाउत्तेजकत्वानभ्युपगमात् नचेछाकालइवतदुत्तरकालेपिउक्तसामग्रीकालीनज्ञानापत्तिरि
तिवाच्यं उक्तसामग्रीकालीनज्ञानेइछायाहेतुत्वाभ्युपगमात् नचैवमपिउक्तसामग्रीकालीनज्ञानेतथाविधेछायाहेतुत्वकल्पन राम०
गौरवाधिकमितिवाच्यं तुल्ययुक्त्याघटाद्युपनीतभानादेर्विरोधिसामग्र्यंतरप्रतिबंधकतायामपीछायाउत्तेजकत्वाभ्युपगमेनेछा ११

धीनव्यभिचारवारणाय स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन विरोधिसामग्र्यंतरविशिष्टंयत्तद्दृश्यत्वस्य प्रतिबध्यतावच्छेदकत्वेनेच्छा
नृत्यकाले विरोधिसामग्र्यंतरकालीनज्ञानवारणाय विरोधिसामग्र्यंतरकालीनतादृशोपनीतभानानां तथाविधेच्छाया हेतुत्वे कल्पनी
ये तादृशसामग्रीवैशिष्ट्यमनिवेश्य तथाविधेच्छाविशिष्टत्वस्यैव जन्यतावच्छेदकत्वोपगमेन तादृशकारणतैयैवोपपत्तौ तादृशानुमि
तिसामग्रीकालीनतथाविधोपनीतभानानामिच्छाया हेतुत्वान्तरस्यावश्यकत्वात् किंच व्यापकसामानाधिकरण्यप्रतानहेतुतामते विशि
ष्टधूमत्वालोकत्वाद्यवच्छिन्नविषयतात्वेन हेतुविषयतानामनुमितिजनकतावच्छेदककोटौ निवेशाद्धेतुतावच्छेदकभेदेन कार्यका
रणभावबाधानेसं न च किंचिद्धर्मावच्छिन्नविषयतात्वेन निखिलहेतुविषयतानां निवेशाच्चानुपपत्तिरिति वाच्यं तथासत्यालोकव्याप
कवह्निसमानाधिकरणधूमवान्पर्वत इति तादृश्यनुमित्सुसत्वापव्याप्तेः साध्याभाववदवृत्तित्वज्ञानहेतुतामते तद्वत्त्यभाववद्वृ
त्तित्वावच्छिन्नप्रकारताशालिनिर्णयत्वेन धूमालोकादिनिखिलपरामर्शानामनुगतरूपेणैव हेतुतया तत्र च विशिष्टधूमत्वालोक
त्वाद्यवच्छिन्नविषयतानामनिवेशाच्च हेतुतावच्छेदकभेदेन कार्यकारणभावबाहुल्यमिति किंस्यादेतत् अस्तु वा व्याप्तेः शरीरलाघवम्

१२ युक्तलाघवंतथापिव्यापकसामानाधिकरण्यज्ञानकारणतामतेऽवसाध्याभाववद्वृत्तित्वज्ञानहेतुतामतेऽपिनिश्चयत्वनिर्वचनगौरवानुरोधेनहेतुता
वच्छेदकानांविशिष्यनिवेशस्यावश्यकतयाहेतुतावच्छेदकभेदेनपरामर्शकारणतादिबाहुल्यंदुष्परिहरमेव तथाहि वन्ह्यभाववद्वृत्ति
त्वादिविशिष्टप्रतियोगिकाभावाप्रकारकत्वेसतिवन्ह्यभाववद्वृत्तित्वाद्यवच्छिन्नप्रकारताशालिज्ञानत्वेननिर्णयत्वंवह्निव्याप्यालोक
वानयंपर्वतःपर्वतोवह्निव्याप्यधूमवानित्याद्यांशिकनिर्णयासंग्रहप्रसंगात्तत्रवन्ह्यभाववद्वृत्तित्वविशिष्टालोकप्रतियोगिकाभावस्य
प्रकारत्वात् नापिवन्ह्यभाववद्वृत्तित्वाद्यवच्छिन्नसामान्याभावाप्रकाकत्वेसतितदवच्छिन्नप्रकारताशालिज्ञानत्वंतत् वह्निव्याप्यधूमवा
न्वायंपर्वतइत्यादिसंशयस्याप्युक्तमित्यापत्तेः तत्रवन्ह्यभाववद्वृत्तित्वाद्यवच्छिन्नधूमत्वावच्छिन्नाभावस्यैवप्रकारत्वेनवन्ह्यभाववद्वृत्तित्वा
वच्छिन्नसामान्याभावाप्रकारकत्वात् वन्ह्यभाववद्वृत्तित्वाद्यवच्छिन्नसामान्याभावाप्रकारकत्वेसतिधूमवन्ह्यभाववद्वृत्तित्वाद्यवच्छिन्न
प्रकारताशालिज्ञानत्वंनिर्णयत्वमित्युक्तौचवह्निव्याप्यधूमवान्पर्वतइत्यादिनिश्चयस्याप्यसंग्रहः तत्रपक्षविशेष्यतानिरूपितधूमप्रकारता एम०
यावन्ह्यभाववद्वृत्तित्वातिरिक्तधूमत्वावच्छिन्नत्वेनवन्ह्यभाववद्वृत्तित्वातिरिक्तधर्मानवच्छिन्नत्वरूपप्रत्युद्धत्वस्याभावात् नचवन्ह्यभाववद्वृत्ति १२

मान्पर्वतस्मादिनिर्णयीयशुद्धवन्ह्यभाववद्वृत्तित्वाद्यवच्छिन्नप्रकारतापि फलबलान्नाहार्यनिर्णये स्वीक्रियते अतो न तत्संग्रहः वह्निव्या
प्यधूमवान्नवा पर्वतस्मादिसंशये च तथाविधप्रकारतायाः कल्पकाभावान्नैतेतोऽनुमितिप्रसंगः पादशे च तथाविधप्रकारतापि
प्रामाणिकी तस्य च वह्निव्याप्यधूमवान्नवा पर्वतः पर्वतो वह्निव्याप्यवानित्याकारकतया तस्मादनुमित्युत्पत्तेन कस्याप्यसंमतिरि
तिवाच्यं उक्तधूमादिगोचरसकलनिर्णयेषु अनुभवविरुद्धनाहार्यप्रकारतायाः स्वीकारे तथाविधनिखिलनिर्णयानामेव वह्निव्या
प्यधूमवान्वह्निव्याप्यवान्पर्वतस्साकारतापसंगात्· किंच वह्निव्याप्यधूमवान्पर्वतस्त्यादिनिखिलनिर्णयानां शुद्धवन्ह्यभावव
द्वृत्तित्वावच्छिन्नप्रकारताशालित्वं न संभवति विरोधिसामग्रीकालीनवह्निव्याप्यधूमत्वावच्छिन्नप्रकारताशालिप्रमस्त्वं तज्जाप
तामिनिच्छाविरहविशिष्टविरोधिसामग्र्या नाहार्यप्रमत्वेहप्रतिबंधकत्वात् शुद्धवन्ह्यभाववद्वृत्तित्वावच्छिन्नप्रकारताशालिप्रत्यक्ष
प्रतिबंधकतायां वह्निव्याप्यधूमत्वावच्छिन्नप्रकारताशालिप्रत्यक्षेच्छाया अप्युत्तेजकत्वेनाहार्यच्छासत्वे धूमत्वादिभासकसामग्र्यसत्वे
शुद्धवह्न्यभाववद्वृत्तित्वावच्छिन्नप्रकारताशालिप्रत्यक्षापत्तेः तस्मादनाहार्यबाधकबला द्वह्निव्याप्यधूमवान्पर्वतस्त्यादिनिर्णयानां

२३ नमुद्ध्रदवन्ह्यभाववद्ध्रदवृत्तित्वावच्छिन्नप्रकारताशालित्वमिति ननुपर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपिताभावप्रकारतानिरूपितप्रति
योगितासंसर्गावच्छिन्नप्रकारतान्यायापर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवन्ह्यादिव्याप्यत्वावच्छिन्नप्रकारतातच्छालित्वानत्व
13 मेवपर्वतत्वाद्यवच्छिन्नधर्मिकवन्ह्यादिव्याप्यवत्त्वानिर्णायकत्वं।प्रकारतात्वप्रकाराभेदात्प्रकारतावच्छेदकभेदाच्चभिद्यते नन्वविशेष्या
दिभेदाद्योपमानाभावात् एवं च वन्हिव्याप्यधूमवान्नवायंपर्वत इत्यादिसंशयीयपर्वतादिविशेष्यतानिरूपितधूमादिप्रकारताया नाह
शविशेष्यतानिरूपिताधूमाभावप्रकारतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारताभिन्नत्वान्नतत्संशयादनुमितिः वन्हिव्याप्या
लोकवान्नवायंपर्वतः वन्हिव्याप्यधूमवानयंपर्वत इत्याद्याशिकनिर्णये च तथाविधधूमादिप्रकारताया अभावविशेष्यतानिरूपितालो
कादिप्रकारताभिन्नत्वात्तन्नतरसंग्रहः अथवन्हिव्याप्यधूमवान्नवायंपर्वत इत्यादिसंशयेपि पर्वतादिविशेष्यतानिरूपितसंयोगादिसं
बंधावच्छिन्नप्रकारताया अभावविशेष्यतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतातोभेदस्यावश्यकः। अन्यथा तादृशज्ञान रा०मं०
सपर्वतादिविशेष्यतानिरूपितप्रतियोगितासंसर्गावच्छिन्नधूमादिप्रकारताशालित्वेनतत्संप्रतियोगितासंसर्गावच्छिन्नप्रतियोगिताक २३

धूमाभाववान्हिप्रकारकपर्वतादिविशेष्यकपर्वतोनधूमीयइत्याद्याकारकबाधबुध्यादिप्रतिबध्यत्वप्रसंगः तादृशधूमादिप्रकारतापा
एवतथाविधबाधबुद्ध्यादिप्रतिबध्यतावच्छेदकत्वादितिचेन्नसंभवत्स्वंपदिपर्वतादिविशेष्यतानिरूपितप्रतियोगितासंसर्गावछिन्न
प्रधूमादिप्रकारताशालिबुद्धित्वंतथाविधबाधबुद्ध्यादिप्रतिबध्यतावच्छेदकंभवेत्तदेवनकिंतुपर्वतादिविशेष्यतानिरूपितप्रतियो
गितानिष्ठसांसर्गिकविषयतानिरूपितधूमादिप्रकारताशालिबुद्धित्वमेवतत्प्रतिबध्यतावच्छेदकं एवंचोपदर्शितसंशयस्यतोक्त
बाधबुध्यादिप्रतिबध्यतावच्छेदकाक्रांतत्वापत्तिः उपदर्शितसंशयस्यपर्वतादिनिष्ठविशेष्यतानिरूपितप्रतियोगितासंसर्गावछि
न्नप्रकारताशालित्वेपिसंयोगादिसांसर्गिकविषयतायामेवपर्वतादिविशेष्यतानिरूपितत्वसत्वेनपर्वतादिविशेष्यतानिरूपित
त्वस्यप्रतियोगितानिष्ठसांसर्गिकविषयतायामसत्वात्। तथाचतत्रप्रकारत्वाभेदेनकोपिदोषइतिचेन्नैवंवह्निव्याप्यधूमवान्वह्नि
व्याप्यधूमाभाववान्वापर्वतइत्याद्याकारकसंशयीयपर्वतादिविशेष्यतानिरूपितधूमादिप्रकारतायाः स्वावच्छेदतासमनियतता
वच्छेदकताकाभावविशेष्यतानिरूपितधूमादिप्रकारत्वाभेदस्यसंभवेपिवह्निव्याप्यधूमवान्धूमाभाववान्पर्वतइत्याद्याकारकसंश

१५ पीयपर्वतत्वादिविशेष्यतानिरूपितवह्निव्याप्यधूमत्वाद्यवच्छिन्नप्रकारतायास्तत्रभावविशेष्यतानिरूपितशुद्धधूमत्वाद्यवच्छिन्नप्रकारतायाश्चाभेद
संभवेनतादृशसंशयादनुमित्यापत्तेः नचतत्रापिप्रकारताभेदेबाधकाभावइतिवाच्यं तथासतिवह्निव्याप्यधूमवान्वह्निव्याप्यधूमाभाव
वान्वाइत्यादिसंशयात्तादृशसंशयस्यैवलक्षणानुपपत्तेः ननुस्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितोभयसंबंधेनपर्वतत्वा
द्यवच्छिन्नविशेष्यतानिरूपिताभावविषयतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारताविशिष्टायाप्रकारतातदन्यायापर्वतत्वाद्यवच्छि
न्नविशेष्यतानिरूपितवह्न्यादिव्याप्यत्वावच्छिन्नप्रकारतानवच्छालिज्ञानत्वमेवप्रकृतेनिर्णयत्वं वह्निव्याप्यधूमवानयंपर्वतइत्यादिसंश
यस्थलेचपर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितधूमादिप्रकारतायास्तथाविधोऽभयसंबंधेनतादृशप्रतियोगितासंसर्गावच्छिन्नधूमा।
दिनिष्ठप्रकारताविशिष्टत्वमेवाक्षितत्वस्वपदार्थोधूमादिनिष्ठतादृशप्रतियोगितासंसर्गावच्छिन्नप्रकारतैवतदवच्छेदकीभूतधूमत्वाद्यवच्छि
न्नत्वस्यतथाविधप्रकारतानिरूपकतादृशसंशयात्मकज्ञाननिरूपितत्वस्यचतदीयपर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितधूमादिप्रका गप०
रतायांसत्वादितितादृशसंशयात्रानुमित्यापत्तिः वह्निव्याप्यधूमवानयंपर्वतइत्यादिनिर्णयेप्रतियोगितासंसर्गावच्छिन्नतथाविधधूमादिप्रकारता १५

याप्यसत्त्वे स्वनिरूपकसंशयात्मकज्ञाननिरूपितत्वस्य निर्णयीयपर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितधूमादिप्रकारतायामसत्त्वान्न
हृदितोभयसंबंधेन तादृशप्रतियोगितासंसर्गावच्छिन्नप्रकारताविशिष्टत्वस्य तथाविधव्याप्यप्रकारतायां सत्त्वमिति न तादृशनिर्णयादनु
मित्यनुपपत्तिः ज्ञानव्यक्तिभेदेन विषयताभेदमंगीकृत्य चेदं तेन न निश्चयीयव्याप्यप्रकारतायास्तथाविधोभयसंबंधेन तादृशप्रतियोगितासं
सर्गावच्छिन्नप्रकारताविशिष्टसंशयीयव्याप्यप्रकारताभिन्नतयानुपपत्तिः वह्निव्याप्यालोकवान्नवा पर्वतः वह्निव्याप्यधूमवांश्चेत्याद्यां
शिकनिर्णयसंग्रहाय स्वावच्छेदकावच्छिन्नत्वेत्यस्य निवेशः वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयसंग्रहाय स्वावच्छेदकनिरूपकज्ञानानि
रूपितत्वेत्यस्य निवेशः स्वत्वस्वावच्छेदकावच्छिन्नत्वमित्यनेन स्वावच्छेदकताव्यापकावच्छेदकताकत्वं विवक्षणीयं अन्यथा वह्निव्याप्या
लोकवान्नवा पर्वतः वह्निव्याप्यधूमवांश्चेत्याद्यांशिकनिर्णयादनुमित्यनुपपत्तेः तत्रापि तादृशप्रतियोगितासंसर्गावच्छिन्नालोकादिनि
ष्ठप्रतियोगितायाः स्वावच्छेदकवह्न्यादिव्याप्यतावच्छिन्नत्वस्य पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितव्याप्यतावच्छिन्नधूमादिप्रकारता
यां सत्त्वेन न हृदितोभयसंबंधेन तादृशप्रतियोगितासंसर्गावच्छिन्नप्रकारताविशिष्टत्वस्य तज्ज्ञानीयतादृशव्याप्यप्रकारतायां संभवान्न विव।

१५ ह्निते तु नैवं तथा सति प्रतियोगितासंसर्गावच्छिन्नालोकादिप्रकारतावच्छेदकत्वस्यालोकादौ सत्त्वात् तत्र च पर्वतत्वाद्यवच्छिन्नविशेष्यता
15 निरूपितधूमादिनिष्ठव्याप्यत्वावच्छिन्नप्रकारतावच्छेदकत्वस्याभावेन स्वावच्छेदकताव्यापकावच्छेदकताकत्वघटितोक्तोभयसंबं
धेन प्रतियोगितासंसर्गावच्छिन्नतादृशालोकादिप्रकारताविशिष्टत्वस्य तथाविधनिर्णयीयपर्वतादिविशेष्यतानिरूपितव्याप्यप्र
कारतायामभावादिति चेन्न तथा सति जातिविशेषत्वादिना यत्र धूमत्वमभावप्रतियोग्यंशे विशेषणतया भानं तत्र जातिविशेषव
दभाववान् वह्निव्याप्यधूमवांश्च पर्वत इत्याकारकनिर्णयादनुमित्यनुत्पत्त्यापत्तेः तत्र निरुक्तोभयसंबंधेन तादृशप्रतियोगितासंबंधेन
तादृशप्रतियोगितासंसर्गावच्छिन्नप्रकारतो विशिष्टत्वस्य तथाविधव्याप्यप्रकारतायां सत्त्वात् न च निरवच्छिन्नस्वावच्छेदकताव्यापका
वच्छेदकताकत्वस्य संबंधघटकतया नोक्तदोष इति वाच्यं तथा सति वह्निव्याप्यजातिविशेषवद्वात्रवा पर्वत इत्यादिसंशयादनु
मित्यापत्तेः एवं ज्ञानव्यक्तिभेदेन विषयताभेदे मानाभावेन निर्णयीयपर्वतादिविशेष्यतानिरूपितव्याप्यप्रकारतायामपि संशयी ग्र०
यतादृशप्रकारताविशिष्टप्रकारत्वाभिन्नतया वह्निव्याप्यधूमवान् पर्वत इत्यादिनिखिलनिर्णयानामप्यसंग्रहप्रसंगाच्च यत्तु विरोधानव १५

छिन्नसंयोगादिनिष्ठसांसर्गिकविषयतानिरूपितायावन्ह्यादिव्याप्यत्वावच्छिन्नप्रकारतातच्छालिज्ञानत्वमेवमन्मते निर्णयत्वं संशये च
धूमादिनिष्ठप्रकारतावच्छेदकसंयोगाद्यात्मकसंबंधांशे धूमाद्यभावकोटिविरोधस्याभासमानतयानहीयसंयोगनिष्ठसांसर्गिकविषयता
याविरोधावच्छिन्नत्वान्नततोऽनुमित्यापत्तिः निश्चयेच विरोधस्यसंसर्गघटकतयाभानानभ्युपगमान्नदोषः अथ विरोधस्य धूमाभावव
दृत्तित्वादिरूपतयातन्निवेशेहेतुतावच्छेदकभेदेनपरामर्शकारणतादिभेदोभवन्मतेपिदुर्वारः वह्निव्याप्यत्वावच्छिन्नाभाववद्वृत्तित्वा
दिरूपविरोधानवच्छिन्नत्वस्यनिवेशेचवह्निव्याप्यधूमवान्नवापर्वतइत्यादिसंशयादप्यनुमित्यापत्तेः तत्रवह्निव्याप्यत्वावच्छिन्नाभावस्याको
टितयातयातदधिकरणवृत्तित्वरूपविरोधस्यभानासंभवात संशयैककोटिसंबंधांशेऽपरकोटिविरोधस्यैवभानाभ्युपगमादितिचेत्तस्या
देवंपरिधूमाभाववद्वृत्तित्वादिरूपविरोधानवच्छिन्नत्वंसंयोगादिसांसर्गिकविषयतायांनिवेश्यतेतदेवतत्किंतुनिखिलविरोधनिष्ठावच्छे
दकताः वह्निव्याप्यप्रतियोगिकाभावाधिकरणनिष्ठावच्छेदकतानिरूपकाधेयत्वनिष्ठावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतात्वेना
नुगमय्यतदनिरूपकत्वमेवसंयोगादिनिष्ठसांसर्गिकविषयतायांनिवेश्यतेतत्रचनकाप्यनुपपत्तिः हेतुतावच्छेदकीभूतधूमत्वालोकत्वादी

१६ 16 नांविशिष्यनिवेशाभावात् नचतथासतिस्त्रालोकाभाववद्दहनित्वविशिष्टसंयोगसंसर्गकधूमप्रकारकज्ञानाहरणमित्यनुदयप्रसंग इतिवाच्यं
धूमवत्ताबुद्धौ आलोकाभाववद्दहनित्वादेः संसर्गघटकतयाभानेमानाभावादिति तत्र तथासतिस्वभावकोटिमात्रसंसर्गघटकतयावि
रोधावगाहिनस्तादृशसंशयस्यसंग्रहप्रसंगात् नहिनिखिलसंशयेकोटिद्वयसंसर्गांश एवविरोधोभासतेइतिवक्तुंयुज्यतेविरोधविशिष्ट
संयोगादिसंबंधावच्छिन्नप्रतियोगिताकधूमाभावावगाहिबाधकालीनतादृशसंशयेविरोधविशिष्टसंयोगादिसंबंधेपर्वतेधूमभानासं
भवात् नचतदानींसंशयएवनोत्पद्यत इतिवाच्यं शुद्धसंयोगविरोधावच्छिन्नविशेषणताभ्यांतथाविधधूमतदभावकोटिकसंशयोत्प
त्तौबाधकाभावात् एवंशुद्धसंयोगपर्याप्तसांसर्गिकविषयतानियामकबाधाभावादिघटितसामग्र्याअपिविरोधविशिष्टसंयोगसंसर्गक
ज्ञानाव्यवहितप्राक्क्षणेसत्वेनतस्यापिशुद्धसंयोगपर्याप्तसांसर्गिकविषयताशालितयातथाविधसंशयआवर्जनमप्यशक्यमेव। नच
शुद्धसंयोगपर्याप्तसांसर्गिकविषयताशालिबुद्धिंप्रतिविरोधविशिष्टसंयोगसंसर्गकज्ञानसामग्र्याःप्रतिबंधकत्वकल्पनात्तथाविधसंश एम०
यआवर्त्तनंसंभवतीतिवाच्यं तथाविधानंतसामग्रीप्रतिबंधकताकल्पनेमहागौरवप्रसंगात् वस्तुतस्तुसंशयेविरोधस्यसंसर्गतयाभानेमा १६

ताभावेन वह्निव्याप्यधूमवानयं पर्वत इत्यादिनिखिलसंशयोत्तरमनुमित्यापत्तिर्ब्रह्मणोपि दुर्वारत्वात् न च संशयस्य समुच्चयपवैलक्षण्यानुरो
धात्संशये विरोधभानस्यावश्यं स्वीकरणीयतया विरोधानुपस्थितिकालीनसंशये विशेषणज्ञानविरहेण विरोधस्य प्रकारतया भाना
संभवात्तस्य संसर्गतासिद्धिरिति वाच्यं विरोधानुपस्थितिकाले संशयस्याप्रामाणिकतया संशयसमुच्चययोर्वैलक्षण्यानुरोधेन संशये विरो
धस्य प्रकारतया एव स्वीकरणीयत्वात् न च तत्तल्लिंगकनिखिलपरामर्शसाधारणनिष्ठप्रत्वनिर्वक्तान्यथानुपपत्त्यैव विरोधस्य संसर्ग
ताकल्प्यत इति वाच्यं तदसंभवेपि हेतुतावच्छेदकभेदेन परामर्शहेतुतासंभवात् न चैवं सति अनन्तकार्यकारणभावकल्पने गौरवमिति
लाघवात् विरोधस्य संसर्गतासिद्धिरिति वाच्यं कार्यकारणभावलाघवबलाद्विषयतासिद्धौ तल्लघुत्वात्संशयव्यावृत्तानिखिलधूमा
लोकादिनिष्ठप्रमात्वनिष्ठामतिरिक्तवह्न्यादिनिरूपितविलक्षणविषयतां गीकृत्य तादृशविषयतावत्त्वेन धूमालोकादिनिखिललिंगका
नुमितिहेतुतापत्तेः एवमपि बुद्धिपदार्थघटितव्याप्त्यादिविषयतानां तथाविधनिष्ठप्रत्वस्य वानिवेशेन लाघवसंभवात् तस्मादेतादृश
बोधकस्य जागरूकतया कार्यकारणभावलाघवबलाद्विषयतासिद्धिरप्रामाणिकीति न किंचिदेतदिति अत्रोच्यते स्वनिष्ठप्रतियोगितावच्छे

१७ दकताकभेदवत्त्वस्यावच्छिन्नवन्ह्यादिव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधेनप्रकारविशिष्ट।
17 ज्ञानत्वमेवप्रकृतेव्याप्यवत्तानिर्णयत्वं भेदप्रतियोगितावच्छेदकताचस्वनिष्ठावच्छेदकतानिरूपिकायाअनुयोगितासंबंधावच्छिन्नाव
च्छेदकतातन्निरूपकाभावप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नायास्त्या भवतिचवह्निव्याप्यालोकवान्न
वापर्वतः पर्वतोवह्निव्याप्यधूमवान्वाइत्याद्याहार्यशिकनिर्णयोपितथाविधोभयसंबंधेनधूमत्वरूपप्रकारविशिष्टः तत्रहिधूम माभावस्याप्र
कारतयाऽदर्शिततथाविधपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वसंबंधेनधूमत्ववतोभेदस्यसत्वात्धूमत्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारता
निरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वस्यापितत्रसत्वाच्च अत्रचतादृशभेदप्रतियोगितावच्छेदकताघटकसंबंधातःपातिस्वनिष्ठा
वच्छेदकतायांस्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेनव्याप्यत्वनिष्ठावच्छेदकताभिन्नावच्छेदकताविशिष्टंयत्तद्धूमत्वंविशेषणंदे
यं अन्यथानीलधूमाभाववान्पर्वतः ववह्निव्याप्यधूमवांश्चपर्वतइत्याद्याकारकनिर्णयासंग्रहप्रसंगात्विशिष्टधूमत्वस्यधूमत्वानतिरिक्त रम०
तयानीलधूमत्वावच्छिन्नाभावस्यापिधूमत्वावच्छिन्नाभावात्तथाविधविशेषणेदत्तेनैषदोषः तत्रहिधूमत्वनिष्ठायाअभावप्रकारतानिरू १७

पितधूमादिनिष्ठातद्योगितासंसर्गावच्छिन्नावच्छेदकतायाः स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन नित्यनिष्ठावच्छेदकताविशिष्टत्वात्।
व्याप्यत्वनिष्ठावच्छेदकताभिन्नत्वनिवेशात् धूमत्वनिष्ठायाः वह्निव्याप्यधूमाभावकोटिकसंशयीयाभावप्रकारतानिरूपिततद्योगिता
संसर्गावच्छिन्नधूमादिनिष्ठावच्छेदकतावच्छेदकतायाः स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन व्याप्यत्वनिष्ठावच्छेदकताविशिष्ट
त्वेपि न क्षतिः तादृशधूमत्वनिष्ठावच्छेदकतायां स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन व्याप्यत्वनिष्ठावच्छेदकताभिन्नावच्छेदक
ताविशिष्टान्यत्वसत्वात् एवं तथाविधस्वनिष्ठावच्छेदकतायां निरवच्छिन्नत्वमपि निवेशनीयं तेन जातिविशेषत्वादिना धूमत्वादिक
मभावविशेषणतापन्नधूमाद्यंशेऽवगाहमानस्य जातिविशेषवदभाववान्पर्वतः वह्निव्याप्यधूमवांश्च पर्वत इत्यादिनिर्णयस्य नासंग्र
हः तत्र च तादृशधूमवन्निष्ठावच्छेदकतायाः जातिविशेषत्वावच्छिन्नत्वात् एवं च स्वावच्छिन्नव्याप्यतावच्छिन्नप्रकारतेतत्र स्वावच्छिन्न
त्वस्वनिष्ठावच्छेदकतानिरूपकत्वे तत्रापि स्वनिष्ठावच्छेदकतायामुक्तविशेषणदेयं तेन वह्निव्याप्यनीलधूमवान्पर्वत इत्याद्याकारक
संशयीयाभावप्रकारतानिरूपितधूमादिप्रकारतानिरूपितधूमत्वादिनिष्ठावच्छेदकतायाः स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन

१८ 18 नीलादिनिष्ठावच्छेदकताविशिष्टत्वेपिज्ञानविशेषद्वात्रवापर्वतस्मादिसंशयीयाभावप्रकारतानिरूपितधूमादिप्रकारतानिरूपितधूम
त्वादिनिष्ठावच्छेदकतायाः स्वावच्छिन्नत्वेपिवनसंगतिः प्रथमेधूमत्वादिनिष्ठायाः पक्षविशेष्यतानिरूपितप्रकारतावच्छेदकतायाः स्वनिरू
पकावच्छेदकतानिरूपितत्वसंबंधेनतादृशनीलादिनिष्ठावच्छेदकताविशिष्टत्वात्द्वितीयेतथाविधधूमत्वादिनिष्ठावच्छेदकतायाज्ञाति
विशेषत्वावच्छिन्नत्वात् नीलधूमत्वाद्यवच्छिन्नलिंगरूपपरामर्शाणांचप्रवन्मतरेवैनन्मतेपिष्टयोगेवहेतुत्वेनतथाप्यतन्मतेशुद्धधूमत्वालो
कत्वादिरूपलिंगतावच्छेदकभेदेनपरामर्शकारणतादिभेदाभावेनलाघवस्यान्तिनत्वात् एतेनविशिष्यहेतुतावच्छेदकविषयतामनिवे
रयवन्ह्याद्यभाववद्वृत्तित्वावच्छिन्नप्रकारताशालिनिर्णयत्वेनानुमितिहेतुत्वेव्यभिचारस्यहेत्वाभासत्वानुपपत्तिः व्यभिचारज्ञानस्यत्वे
पितत्प्रदर्शितकारणतावच्छेदकावच्छिन्नस्यव्याप्त्यंशेनिधर्मितावच्छेदकयद्विस्योत्पत्तौबाधकाभावेनतदानीमनुमित्युत्पादेनतस्यानुमि
तिविरोधित्वाभावात्नचानुमितिजनकीभूततद्धर्मितावच्छेदकव्याप्तिग्रहविरोधित्वेनैवव्यभिचारस्यहेत्वाभासत्वमुपपद्यतइतिवा एम०
च्यं अनुमितिजनकीभूतयत्किंचित्ज्ञानविरोधिज्ञानविषयत्वेनैवहेत्वाभासत्वस्वीकारेधूमलिंगकानुमितिजनकीभूतधूमवद्वृत्तोभपर्लि १८

गकसमूहालंबनपरामर्शविरोधितानविषयतयाऽव्याप्यत्वनिष्ठवह्निव्यभिचारस्यापि धूमलिंगकानुमितौ हेत्वाभासतापत्तेः तथा च यत्प्र
युक्तः क्वचिदनुमित्यनुत्पादः स एव हेत्वाभासः न च व्यभिचारप्रयुक्तः कुत्राप्यनुमित्यनुत्पादः तज्ज्ञानसत्वेपि निर्धर्मितावच्छेदककव्या
प्तिग्रहोत्तरमनुमित्यनुत्पादस्यावश्यकतया तज्ज्ञानस्याऽनुमित्यनुत्पादप्रयोजकत्वविरहादित्यपि परास्तं निर्धर्मितावच्छेदककव्याप्ति
ग्रहस्यापरामर्शितोभयसंबंधेन प्रकारविशिष्टत्वाभावादनुमित्यजनकतयाऽनुमितिजनकीभूतसधर्मितावच्छेदककव्याप्तिग्रहविरो
धित्वेनैव व्यभिचारस्य हेत्वाभासत्वोपपत्तेरिति अथ मन्मते वह्निव्याप्यधूमाभाववान्पर्वतः पर्वतो वह्निव्याप्यधूमवांश्चेत्यादिसमुच्च
यात्मकज्ञानानंतरमनुमित्युदयप्रसंगस्तस्य तादृशपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वसंबंधेन धूमत्वादिविशिष्टतयाऽनुद्देश्यत्वाभावा
दिति चेन्न संशयसमुच्चययोर्वैलक्षण्योपपत्तेः पक्षतावच्छेदकावच्छेदेनान्यतरकोट्यवगाहित्वं संशयः सामानाधिकरण्यमात्रेणो
भयकोट्यवगाहित्वं समुच्चय इत्यवश्यमुपगंतव्यं एवं च पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिपरामर्शस्य पक्षतावच्छे
दकावच्छिन्नत्वावगाहिपरामर्शस्य च हेतुताया भिन्नत्वेन पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिपरामर्शहेतुतायां भेदप्रसि

१९ योगितावच्छेदकताघटकसंबंधांतर्गताभावप्रकारतायांपर्वतत्वाद्यवच्छिन्नविशेषणतासंसर्गावच्छिन्नत्वस्यद्वितीयसंबंधघटकीभूत
व्याप्यत्वावच्छिन्नप्रकारतायांशुद्धसंयोगसंसर्गावच्छिन्नत्वस्यचनिवेशनेनतथाविधपरामर्शनिष्ठानुमितिजनकतावच्छेदकाक्रांतत्वे
यातादृशसमुच्चयात्रानुमित्यनुपपत्तिः केचित्तुसर्वत्रसंशयेसमुच्चयेवैलक्षण्यापकोद्यधिकरणयोः संसर्गतावच्छेदकतयापारस्प
र्यविरोधाभासेतरत्वेनिवह्निव्याप्यधूमवानत्रवेतिसंशयेधूमस्यधूमाभावाधिकरणवृत्तित्वरूपविरोधावच्छिन्नसंयोगः धूमाभावस्यचधूमा
धिकरणावृत्तित्वरूपविरोधावच्छिन्नविशेषणताविशेषः संसर्गतयाभासतेतथाचस्वावच्छिन्नप्रतियोगिताकाभावनिष्ठप्रकारतानि
रूपितविरोधावच्छिन्नविशेषणताविशेषनिष्ठसांसर्गिकविषयतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नस्वनिष्ठ
प्रतियोगितावच्छेदकताकभेदवत्वव्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वोभय
संबंधेनकिंचिद्धर्मविशिष्टज्ञानत्वमेवहेतुतावच्छेदकाघटितंसमुच्चयसाधारणंनिश्चयत्वं ननुधूमाधिकरणावृत्तित्वादिरूपविरो ॥म०
धस्यहेतुतावच्छेदकधूमत्वादिघटितत्वात्कथंधूमत्वादिकमनिवेश्यैतात्रिश्चयत्वंसुवचनं नचकिंचिद्धर्मावच्छिन्नावच्छेदकतानिरूपिका १९

पाधिकरणनिष्ठावच्छेदकतानतिरिक्तनिरूपिकायाधेयत्वनिष्ठास्वावच्छेदकतानतिरिक्तनिरूपिकायास्वाभावनिष्ठावच्छेदकतानतिरिक्तनिरूपकत्वमेव
विरोधावच्छिन्नत्वपदार्थः तथाच न हेतुतावच्छेदकनिवेश इति वाच्यं यत्राव्याप्यवृत्तित्वज्ञानकालीनवह्निव्याप्यधूमवान्धूमाभा
ववांश्च पर्वत इति समुच्चये आलोकाधिकरणवृत्तित्वरूपविरोधावच्छिन्नविशेषणताविशेषस्य धूमाभावसंबंधत्वेन भाने तादृशस
मुच्चयासंग्रहादिति चेन्न तद्धर्मावच्छिन्नविरोधस्यैव तद्धर्मावच्छिन्नत्वाभावसंसर्गतावच्छेदकतया भानांगीकारेणालोकाधिकरणवृत्ति
त्वरूपविरोधावच्छिन्नविशेषणतासंसर्गकधूमाभावप्रकारकज्ञानस्यालीकतयास्वावच्छिन्नाभावप्रकारतानिरूपितया किंचिद्धर्मा
वच्छिन्नाधिकरणवृत्तित्वरूपविरोधावच्छिन्नविशेषणताविशेषनिष्ठसांसर्गिकविषयतानतिरिक्तनिरूपितपर्वततावच्छिन्नविशेष्यता
कत्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वघटितोक्तोभयसंबंधेन किंचिद्धर्मविशिष्टज्ञानत्वरूपनिर्णयत्वस्यानुमि
तिजनकतावच्छेदकत्वे दोषाभावात् वस्तुतस्तु स्वनिष्ठायाविशेषणताविशेषनिष्ठसांसर्गिकविषयतानतिरिक्तनिरूपितपर्वततावच्छि
न्नविशेष्यताकत्वसभेदप्रतियोगितावच्छेदकतावच्छेदकसंबंधत्वाभ्युपगमान्न दोषः सांसर्गिकविषयतायां स्ववैशिष्ट्यं च स्वनिष्ठाव

१० छेदकतानिरूपितप्रतियोगितासंबंधावच्छिन्नप्रकारतानिरूपिताभावप्रकारतानिरूपितत्वस्वनिष्ठाऽवच्छेदकतानिरूपकावच्छेदकता
निरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकाधेयत्वनिष्ठावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकत्वोभयसंबंधेन आलो
काधिकरणवृत्तित्वरूपविरोधावच्छिन्नविशेषणतासंसर्गकधूमाभावप्रकारकसमुच्चयीयविशेषणताविशेषनिष्ठसांसर्गिकविषय
तायां चैतेनादृशोभयसंबंधेन कस्यापि धर्मस्य वैशिष्ट्यं धूमत्वस्य द्वितीयसंबंधविरहात् आलोकत्वस्य च प्रथमसंबंधविरहादिति सा
देनत्·यत्र संशये शुद्धविशेषणताविशेषसंबंधेन धूमाभावस्य धूमाभावाधिकरणवृत्तित्वरूपविरोधावच्छिन्नसंयोगादिना धूमस्याव
गाहनेनादृशसंशयवारणासंभवः तस्य धूमाभावप्रकारतानिरूपितविरोधावच्छिन्नविशेषणतासंसर्गकत्वाभावात् न च सर्वत्र संशये
कोटिद्वयाधिकरणयोरेव संसर्गतावच्छेदकतया कोटिद्वयस्य विरोधो भासत इति वाच्यं विरोधावच्छिन्नविशेषणताविशेषावच्छिन्नप्र
तियोगिताकधूमाभावाभावस्य निर्णयकाले शुद्धविशेषणताविशेषेण धूमाभावप्रकारकस्य विरोधावच्छिन्नसंयोगादिना च धूमप्र गाम०
कारकस्य संशयोत्पत्तौ बाधकाभावात् कोटिद्वयस्यैव भासकसामग्रीसत्त्वात् विरोधविषयकस्य तस्य समुत्पत्त्यभावात् एवं यत्र संशये १०

कोट्यधिकरणयोःसंसर्गतावच्छेदकत्वेनविरोधस्यनभानमपितुस्वातंत्र्येणएककोट्यंशेऽपरकोटेर्विशेषसंबंधेनभानंतादृशसंशयपूर्वा
रणासंभवः एवंएककोट्यंशेऽपरकोटिविरोधप्रकारकस्यापिसंशयस्यनवारणासंभवति एतेनस्वनिष्ठनिरुक्तसंबंधावच्छिन्नप्रतियोगि
तावच्छेदकताकभेदवत्वव्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारतानिरूपितशुद्धसंयोगनिष्ठसांसर्गिकविषयतानिरूपिपर्वतत्वाव
च्छिन्नविशेष्यताकत्वोभयसंबंधेनकिंचिद्धर्मविशिष्टज्ञानत्वंनिर्णयत्वमितिपरास्तमेवं स्वावच्छिन्नाभावप्रकारतानिरूपितपक्षतावच्छे
दकावच्छिन्नविशेष्यताकत्वस्वावच्छिन्नप्रकारतानिरूपितविरोधावच्छिन्नसंयोगादिनिष्ठसांसर्गिकविषयतानिरूपिपर्वतत्वावच्छिन्न
विशेष्यताकत्वोभयसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्वस्यापिसंबंधमध्येनिवेशणीयत्वात् स्वावच्छिन्नप्रकार
तानिरूपितविरोधावच्छिन्नसंयोगादिनिष्ठसांसर्गिकविषयतेतस्यस्वावच्छिन्नप्रकारतानिरूपितत्वस्वावच्छिन्नप्रतियोगितासंबंधा
वच्छिन्नावच्छेदकतानिरूपकाभाववनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकाधेयत्वनिष्ठावच्छेदकतानि
रूपकाभाववनिष्ठावच्छेदकतानिरूपकत्वोभयसंबंधेनस्वविशिष्टसंयोगनिष्ठसांसर्गिकविषयताऽस्यार्थः तेनयत्रवह्निव्याप्यधूमवान्स्

२१ 21 मामावत्वांश्चेति समुच्चये स्यालोकाभावाधिकरणे हत्त्रित्वरूपविरोधावच्छिन्नसमयोगस्यध्वमसंबंधत्वेन भानं तादृशसमुच्चयस्यनासंग्रहः।
यत्रसंशयेकोद्यधिकरणयोः संसर्गतावच्छेदकविधयानविरोधभाने किंतस्मात्तेयोगेककोट्यंशे विरोधसंबंधेनापरकोटेः प्रकारतया
भानं तादृशस्य ध्वमाभावांशे विरोधसंबंधेन ध्वमावगाहिनः संशयस्य वारणाय स्वावच्छिन्नप्रकारतानिरूपितत्वस्वावच्छिन्नावच्छेदकता
निरूपकाधिकरणानिष्ठावच्छेदकतानिरूपकाधेयत्वनिष्ठावच्छेदकतानिरूपकाभावनिष्ठसांसर्गिकविषयतानिरूपकत्वोभयसं-बं
धेन स्वविशिष्टाया विशेष्यतानतद्दत्वस्वावच्छिन्नाभावप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वोभयसंबंधेन स्वविशि
ष्टप्रतियोगितावच्छेदकभेदवत्वमपि संबंधे निवेशनीयं एवं ध्वमांशे विरोधसंबंधेन ध्वमाभावावगाहि संशयवारणाय स्वावच्छिन्नाभा
वप्रकारतानिरूपितत्वस्वावच्छिन्नावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकाधेयत्व
निष्ठावच्छेदकतानिरूपकाभाववृत्तिसांसर्गिकविषयतानिरूपकत्वोभयसंबंधेन स्वविशिष्टविशेष्यतावत्वस्वावच्छिन्नाभावप्रकार राम०
तानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वोभयसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्वमपि संबंधे निवेश्यं य २१

त्रसंशये धूमाभावांशे धूमाधिकरणावृत्तित्वं प्रकारः तद्वारणाय स्वावच्छिन्नावच्छेदकतानिरूपकाधिकरणनिष्ठप्रकारतानिरू॰ पिता
धेयत्वनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतानिरूपिताभावनिष्ठप्रकारतानिरूपितस्वस्वावच्छिन्नाभाववत्त्वावच्छिन्नत्वोभयसंबंधेन स्ववि
शिष्टविशेष्यतावत्त्वस्वावच्छिन्नाभावप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वोभयसंबंधावच्छिन्नस्वनिष्ठप्रतियोगि
तावच्छेदकताकभेदवत्त्वं निवेश्यं धूमांशे धूमाभावाधिकरणावृत्तित्वरूपविरोधप्रकारकस्य संशयस्य वारणाय स्वावच्छिन्नाप्रतियो।
गितासंसर्गावच्छिन्नावच्छेदकतानिरूपकाभावनिष्ठप्रकारतानिरूपिताधिकरणनिष्ठप्रकारतानिरूपिताधेयत्वनिष्ठप्रतियोगितासंस
र्गावच्छिन्नप्रकारतानिरूपिताभावनिष्ठप्रकारतानिरूपितत्वस्वावच्छिन्नत्वोभयसंबंधेन स्वविशिष्टविशेष्यतावत्त्वस्वावच्छिन्नाभावप्रका
रतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वोभयसंबंधेन स्वविशिष्टविशेष्यतावत्त्वस्वावच्छिन्नाभावप्रकारतानिरूपितपक्षतावच्छे
दकावच्छिन्नविशेष्यताकत्वोभयसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वमपि निवेश्यं वस्तुतस्तु सर्वत्र संशये समुच्च
यं वैलक्षण्यात् एककोट्यंशे कोट्यन्तरविरोधस्य प्रकारतयैव भानमुपपत्तेन च विरोधानुपस्थितिकालीनसंशये विरोधस्य प्रकारतया भाना

२२ संभवः विरोधस्याभाववत्त्वप्रतयाप्रमाधिकरणादिरूपविभिन्नंखलपदार्थविषयकज्ञानाद्विशेष्येविशेषणमितितत्सातज्ञानस्यासंभवादिति
22 वाच्यं विरोधानुपस्थितिकालीनसंशयस्याप्रामाण्यग्रहासंशयोऽनुभवसिद्धः फलबलेनतत्पूर्वंच ततः स्मरणादिरूपस्यैवविरोधज्ञानस्यक
ल्पनात्पराचधर्मिकेकोटिद्वयोपस्थितिरानुभाविकीविरोधज्ञानाभावस्त्वप्रामाणिकः तदुत्तरंविरोधज्ञानानंतरमेवक्षणैकविलंबेनसंशयः
क्षणैकविलंबस्यसंशयस्यनिर्णयत्वात् नचतदानींकोटिद्वयोपस्थित्यनंतरमेवधर्मैककोटिविशिष्टबुद्धिसामग्रीबलात्धर्मैककोटिविशि
ष्टबुद्ध्यापत्तिः इष्टापत्तौचद्वितीयक्षणेऽपिसंशयानुपपत्तिः एवं ज्ञानस्यविरोधाविषयकत्वेननिर्णयतयाच्चव्याप्यवृत्तित्वज्ञानाभावसहित
स्यविपरीतकोटिविशिष्टबुद्धिसामग्र्याप्रतिबंधकत्वादितिवाच्यं विरोधस्यसंसर्गतयाभानेऽपिविरोधसंबंधेनैककोट्यंशेः परकोटेर्बाधे
विरोधावच्छिन्नसंयोगेनतादृशविशेषणतयाचकोट्योरधिकरणांशेबाधेविरोधोपस्थितिसमकालेधर्मैकसामग्रीवशात्कोटिद्वयवि
शिष्ट•बुध्यापत्तेः इष्टापत्तौचक्षणद्वयविलंबेनापिसंशयासंभवात्तद्वारणस्यचयदिविरोधसंबंधविषयकताद्धर्मिकैककोटिकविशि राम०
ष्टबुद्धिसमयापरकोटिविरोधभासकसामग्र्यभावविशिष्टाव्याप्यवृत्तित्वज्ञानाभावविशिष्टापरकोटिविशिष्टबुद्धिसामग्र्याः प्रतिबंधकत्व २२

कल्प्यते न तावन्मात्रमपि विरोधप्रकारकैककोटिविशिष्टबुद्धिं प्रति स्वपरकोटिविरोधानुपस्थितिविशिष्टापरकोटिविशिष्टबुद्धिसामग्र्याः प्रति
बंधकत्वस्य कल्पनीयत्वात्तन्मात्रात्संशयापत्तेरिति न च विरोधस्य संसर्गतयैव भाने कुतो नोपपद्यत इति वाच्यं बहुपदार्थघटितविरोधस्य सांसर्गिक
विषयतायाः कुत्रापि ज्ञानेऽकल्पनात् स्वरूपविषयतामेव संशयसमुच्चययोर्वैलक्षण्योपपत्तावतिरिक्तविषयतायां मानाभावात् तत्सं
शयातिरिक्तज्ञाने विरोधस्य सांसर्गिकविषयतायाश्चानुभवसिद्धत्वेऽपि संशयसमुच्चययोर्वैलक्षण्याय विरोधस्य संसर्गतांशे स्वीक्रियते
तदनुरोधेन घटादेर्वैसम्यविनिगमनाविरहात् विरोधस्य संसर्गताया ज्ञानान्तरेकसत्त्वे घटादेरपि सांसर्गिकविषयताया ज्ञानान्तरेऽस्फुटत्वे
नात्मकस्य नाविरहात् च प्रत्यक्षयोर्विरोधित्वज्ञानदशायां संशयानुत्पादस्यानुभवसिद्धत्वेन विरोधस्यैव संसर्गताभ्युपगमेन घटादे
:तथा सति कोट्योर्विरोधित्वज्ञानदशायामपि संशयापत्तेः घटादिसंसर्गकज्ञानेऽविरोधित्वज्ञानस्याविरोधित्वादिति घटादिसंस
र्गकज्ञाने प्रमात्वपि च विरोधित्वज्ञानस्य प्रतिबंधकत्वकल्पने च गौरवं विरोधस्य सांसर्गिकविषयतास्वीकारे तु विरोधित्वज्ञाने प्रमावि
रोधित्वज्ञानस्य तत्संप्रतिबंधकतयैव निर्वाह इति चेन्न विरोधसंसर्गकज्ञाने प्रमात्वविरहविशिष्टत्वज्ञानस्य प्रतिबंधकत्वाकल्पनात् न

२३ 23 हिसंसर्गांशे बाधः प्रतिबंधकः अतिरिक्तप्रतिबंधकताकल्पनेन तु घटादिसंसर्गकज्ञानं प्रत्यपि प्रतिबंधकत्वकल्पनसंभवादित्याहुः अन्ये
तु स्वावच्छिन्नविषयतानिरूपिताधिकरणत्वविषयतानिरूपिताधेयत्वविषयतानिरूपिताभावविषयतावत्त्वसंबंधावच्छिन्नस्वनिष्ठप्र
तियोगितावच्छेदकताकभेदवत्त्वव्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधेन
प्रकारविशिष्टज्ञानत्वमेव निर्णयत्वं तादृशाभावविषयतावत्त्वं च स्वनिरूपकत्वस्वनिरूपिताभावविषयतावच्छेदकावच्छिन्नप्रकारतानिरू
पितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधेन बोध्यं संशयसमुच्चययोर्वैलक्षण्यानुरोधेन संशये विरोधभानमवश्यं अंगीकार्यं तत्र चो
पस्थितिविरोधस्य प्रकारतयाभानमुपस्थितस्य च संसर्गतयेति विशेषः एवं च वह्निव्याप्यधूमवानयं धूमविरुद्धधूमाभाववानित्याकारक
विरोधप्रकारकसंशयस्य तथाविधाभावविषयतावत्त्वसंबंधेन धूमत्ववत्त्वायातद्रूपस्य तत्त्वात्तेन तद्बुद्धिनोभयसंबंधेन प्रकारविशिष्टत्वा
भावात्तेनतोऽनुमितिः एवं सांसर्गिकविषयतादिसाधारणविषयतात्वेनाधिकरणविषयतादीनां निवेशात् विरोधसंसर्गकस्य निखिलसं ग००
शयस्य व्यावृत्तिः अत्र एककालीनत्वसंबंधेन विशेषप्रकारकसमुच्चयसंग्रहाय स्वस्वरूपसंबंधानवच्छिन्नप्रकारतान्यत्वमभावविषयतायां निवे २३

शनीयं न तु स्वरूपसंबंधावच्छिन्नत्वं तथा सति विरोधसंसर्गकसंशयस्यासंग्रहापत्तेः नचैवमपि प्रकारतया संसर्गतया वा धूमाभावादिप्रका
रितियोगिकविरोधावगाहिनः संशयादनुमित्यापत्तिरिति वाच्यं स्वावच्छिन्नविषयतानिरूपिताभावविषयतानिरूपिताधिकरणविषयतानि
रूपितवृत्तित्वविषयतानिरूपिताभावविषयतावत्त्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदांतरस्यापि कारणतावच्छेदकताव
च्छेदकसंबंधमध्ये निवेशनीयत्वात् तादृशाभावविषयतावत्त्वं च स्वनिरूपकत्वस्वनिरूपितविषयतावच्छेदकावच्छिन्नप्रकारतानिरूपित
पर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधेन बोध्यं अत्र च सांसर्गिकविषयतादिसाधारणविषयतात्वेनैवाभावविषयतादीनां निवे
शात् धूमाभावप्रतियोगिकविरोधप्रकारकाणां तथाविधविरोधसंसर्गकाणां च निखिलसंशयानामेवारणं संभवतीति न काप्यनुपपत्ति
रिमाहुः अपरे तु अव्याप्यवृत्तित्वज्ञानोत्तरत्वमेव संशयानंतरसमुत्पन्नस्यैव लक्षणं तत्तद्विषयताकृतं वैलक्षण्यं अव्याप्यवृत्तित्वं च तद्धर्मे विशेष
णतद्धर्मावच्छिन्नाभावाधिकरणवृत्तित्वमेव एवं च स्वावच्छिन्नत्वस्वावच्छिन्नप्रतियोगितासंसर्गावच्छिन्नप्रकारतानिरूपिताभावप्रकारतानिरूपि
ताधिकरणप्रकारतानिरूपितवृत्तित्वप्रकारतानिरूपितत्वोभयसंबंधेन किंचिद्धर्मविशिष्टयावत्स्वीयविशेष्यतातदवच्छेदकावच्छिन्नत्वसंबंधाव

२५ छिन्नज्ञानत्वावच्छिन्नप्रतियोगिताकाभावविशिष्टायास्तावच्छिन्नप्रकारतातन्निरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपिताभावप्रका
24 रतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्वव्याप्तिप्रकारतानिरूपितस्वावच्छि
न्नप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबंधेन किंचिद्धर्मविशिष्टज्ञानत्वमेव हेतुतावच्छेदकाघटितं निर्णयत्वं ज्ञाने च तत्
त्पुरुषीयत्वं निवेशनीयं तेन एकपुरुषीयधूमो धूमाभावाधिकरणवृत्तिरित्याप्यवृत्तित्वज्ञानोत्तरोत्पन्नपुरुषांतरीयसंशयात्तानुमित्याप
त्तिः वस्तुतस्तु स्वसमानाधिकरणज्ञानाभावविशिष्टसाध्यप्रकारत्वाभावविशिष्टत्वस्वनिरूपितत्वोभयसंबंधेन ज्ञानविशिष्टव्याप्यप्रकारता
निरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यता शालिज्ञानत्वमेव निर्णयत्वे अत्र च विशिष्टत्वांतर्गतस्वनिष्ठावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छे
दकतानिरूपकवृत्तित्वनिष्ठावच्छेदकतानिरूपकज्ञानत्वावच्छिन्नप्रतियोगित्वसंबंधावच्छिन्नावच्छेदकतानिरूपकाभावनिष्ठावच्छेदकता
निरूपकत्वस्वनिष्ठनिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकत्वोभयसंबंधेन स्वविशिष्टायाप्रकारतानिष्ठप्रतियोगितानिरूपकाभाववत्त्व एप्र०
मित्यर्थः ज्ञानाभावस्वस्वीयप्रवृत्तिकोभयसंबंधेन किंचिद्धर्मविशिष्टायाविशेष्यतानवच्छेदकावच्छिन्नत्वसंबंधावच्छिन्नप्रतियोगिताको बोध्यः २५

।प्रकारत्वाभावश्च स्वनिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपिताभावप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यता
निरूपितस्वावच्छेदकावच्छिन्नत्वोभयसंबंधावच्छिन्नप्रतियोगिताको बोध्यः धूमाभावाधिकरणवृत्तिर्धूमइत्याद्याकारकाव्याप्यवृत्तित्वज्ञा
नोत्तरोत्पन्ने वह्निव्याप्यधूमवान् तदभाववांश्च पर्वत इत्याद्याकारकसमुच्चये च प्रतियोगितासंबंधावच्छिन्नधूमादिप्रकारताकज्ञानाभावविशि
ष्टतज्ज्ञानेनादृशसमुच्चयात्मकज्ञानसमानाधिकरणस्याव्याप्यवृत्तित्वज्ञानस्य निरुक्तसंबंधेन समुच्चयात्मकज्ञानीयप्रतियोगिता
संबंधावच्छिन्नधूमादिप्रकारतायां सत्त्वात् अतो ज्ञानाभावविशिष्टप्रकारतायास्तदानीं तादृशव्याप्यप्रकारतायामभावसत्त्वाच्च तादृश
समुच्चयादस्तुमित्यनुपपत्तिः एवं प्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपिताभावप्रकारतायां स्वावच्छिन्नप्रतियोगिताकाभावत्वाव
च्छिन्नत्वस्वावच्छिन्नप्रकारतानिरूपिताधिकरणप्रकारतानिरूपितवृत्तित्वप्रकारतानिरूपितत्वोभयसंबंधेन किंचिद्धर्मविशिष्टायास्तो।
विशेष्यतानवच्छेदकावच्छिन्नत्वसंबंधावच्छिन्नस्वसमानाधिकरणज्ञानत्वावच्छिन्नप्रतियोगिताकाभावविशिष्टत्वं निवेशनीयं तेन धूमा
धिकरणवृत्तिर्धूमाभाववदित्याद्याकारकाव्याप्यवृत्तित्वज्ञानोत्तरोत्पन्ने वह्निव्याप्यधूमवान् धूमाभाववांश्च पर्वत इत्याद्याकारकसमुच्चयाद

२५ पितानुमित्यनुपपत्तिरित्यूचुः नवीनास्तु नवीनास्तु सर्वत्र संशये विरोधादिभानस्याप्रामाणिकतया समुच्चये वैलक्षण्याय संशये भावाभा
वोभयप्रकारतानिरूपितैकैवविशेष्यतास्वरूपे पर्यन्ते समुच्चये च भावाभावोभयप्रकारतानिरूपिता विशेष्यता भिन्नैव चात एव विरुद्धोभ
यप्रकारतानिरूपितैकविशेष्यताशालिज्ञानं संशय इति संशयलक्षणमुपकारैरुक्तं एवं च प्रकारताद्वयानिरूपितव्याप्यप्रकारतानिरूपि
तपर्वततावच्छिन्नविशेष्यताशालिज्ञानत्वमेव निर्णयत्वं प्रकारताद्वयनिरूपितत्वं च वस्तुनिष्ठप्रकारतानिरूपितत्वस्वभिन्ननिष्ठप्रकारता
निरूपितत्वोभयसंबंधेन प्रकारताविशिष्टान्यत्वेनातो हि स्यादुर्वचत्वेपि न क्षतिः नव्योक्तापि विशेष्यता संशयसाधारणी तत्रियामसामग्र्या
:संशयपूर्वसत्त्वादिति वाच्यं ताहशविशेष्यताशालिबुद्धिं प्रति संशयसामग्र्याः प्रतिबंधकत्वस्वीकारात् नचेदृशमेव गौरवमिति वाच्यं पर
मर्शस्यानुमितिकारणतायां व्याप्यभावादिविशिष्टबुद्धिं प्रतिबंधकतायां भिन्नविषयकानुमितिसामग्रीनिष्ठविषयभेदभिन्नानंतप्रति
बंधकतायां च लघुतरनिरूपितत्वस्यावच्छेदककोटिनिवेशावच्छेदकलाघवेन बहुतरकार्यकारणभावाकल्पनेन च तथाविधसंशयसा एप०
मग्र्याः प्रतिबंधकत्वकल्पनायां गौरवाभावात् नचैताहशक्रमेणानुमितिं प्रति हेतुत्वे व्याप्यांशे निर्धर्मितावच्छेदकग्रहस्याप्यनुमितिहेतु २५

तथाव्यभिचारस्य हेत्वाभासत्वानुपपत्तिरिति वाच्यं कथायां परोपन्यस्ते हेतौ व्यभिचारे समुद्भाविते त्वाशामाणपसंशयानास्कंदितपरा
मर्शानुपपत्त्या न हेत्वाभासत्वसंभवात् सधर्मितावच्छेदकत्वानविरोधितायाः रापनत्वज्ञाणसत्वाच्च वस्तुतस्तु संशयसमुच्चययोर्वैल
क्षण्यापसंशये भावाभावप्रकारतानिरूपितविशेष्यतयोरवच्छेद्यावच्छेदकभावः स्वीक्रियते एवं च वन्ह्यादिव्याप्याभावप्रकारतानिरूपि
तविशेष्यतानवच्छिन्नायाः वन्ह्यादिव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताच्छालिज्ञानत्वमेव निर्णयत्वं। एतेन ए
कत्रह्दर्पमितिरीत्या वन्हिव्याप्यधूमवद्वन्हिव्याप्यालोकाभाववादिकमवगाहमानस्य वन्हिव्याप्यालोकाभाववान्पर्वतो वा न्हिव्याप्यधूमवानि
त्यादिनिर्णयस्यासंग्रहप्रसंगः तस्य वन्हिव्याप्यधूमवान्पर्वतः वन्हिव्याप्यालोकाभाववांश्च पर्वत इत्याद्याकारकसमूहालंबनतो हेलक्ष
ण्यापत्तये धूमालोकाभावादिप्रकारतानिरूपितैकविशेष्यताशालित्वस्यावश्यस्वीकरणीयत्वात् स्वैवेलक्षण्ये तु विशिष्टापत्तेर्वानु
भवविरोधात् एवं पर्वतत्वावच्छेदेन वन्हिव्याप्यधूमादिकं नीलपर्वतत्वविशिष्टे च तदभावमवगाहमाने संशये विशेष्यतयोरैक्यासंभ
वेन तस्मात् तन्निश्चयापत्तिः तदसंभवाच्च स्वावच्छेदकभेदेन नी० लपर्वतो वन्हिव्याप्यधूमवान्न वेत्यादिसंशयादेवैलक्षण्योपपत्तावश्चेतिपरा

२६ स्तं एकत्रद्वयमितिरीत्योक्तनिर्णयेभावभावप्रकारतानिरूपितविशेष्यतयोरैक्येपितयोरवच्छेद्यावच्छेदकभावस्यानंगीकारेणाद्यदोषा
26 भावात् उक्तसंशयेचतादृशविशेष्यतयोरैक्यासंभवेप्यवच्छेद्यावच्छेदकभावेबाधकाभावेनद्वितीयदोषस्याप्यभावात्ः यदिच संश
येप्रकारतैवकोटितारव्याविलक्षणानुभयमतेतद्वावृत्तत्कोटितात्वंव्याप्यप्रकारतायांविशेषणंदेयमितिनसमुच्चयासंग्रहइतिमा
ढुः नन्वेवंस्मृतेर्धूमाभाववद्वह्निविशेष्यतानिरूपितत्वावच्छिन्नधूमप्रकारितात्वादिरूपनानाविधाप्रामाण्यग्रहाणामेकत्रानुमितिजन
तावच्छेदककोटौनिवेशनापत्त्याएकविधपरामर्शकालेऽन्यविधाप्रामाण्यग्रहसत्वेऽनुमित्यनुत्पत्तिरतस्तद्वारणायतत्तद्प्रामाण्यग्रहा
भावानांप्रत्येकंनिवेश्यधूमत्वालोकत्वादिरूपहेतुतावच्छेदकभेदेनपरामर्शहेतुताःकल्पनीयाः एवंचसाध्याभाववद्वृत्तित्वज्ञानहेतु
तामतेहेतुतावच्छेदकभेदेनपरामर्शहेतुताभेदोदुर्वारएव नचाप्रामाण्यग्रहाभावस्यानुमितिंप्रतिस्वातंत्र्येणहेतुतयाऽनुमितिजनकता
वच्छेदककोटौतन्निवेशप्रसक्त्यालीतिवाच्यं धूमपरामर्शसत्वेइदंज्ञानंधूमाभाववद्वृत्तिधूमप्रकारकमितिप्रामाण्यग्रहसत्वेऽनुमित्यनुदयप्र साम०
संगात् वह्न्यालोकपरामर्शकालेतादृशाप्रामाण्यग्रहसत्वेऽनुमित्युत्पत्तिप्रयोजिकायाश्चान्यादृशाप्रामाण्यग्रहाभाववद्व्याप्यत्वावच्छिन्नप्र २६

कारितायाः शालिनिर्णयत्वावच्छिन्नायाघात्मककारणालोमघटितसामग्र्याः प्रकृतेप्युत्पन्नत्वात् आलोकपरामर्शत्वस्य जनकतावच्छेदकतया
तदवच्छिन्नाभावस्य कारणतावच्छेदकावच्छिन्नसमुदायात्मकसामग्र्यभावाप्रयोजकत्वात् न च धूमाभावविशेष्यतानिरूपितनिरूपितत्वावच्छि
न्नधूमप्रकारितादिरूपनिर्विकल्पाप्रामाण्यग्रहाणां स्वापधूमाभाववद्वह्निविशेष्यितानिरूपितत्वप्रकारतानिरूपितविशेष्यतावच्छेदके धूमप्रका
रितात्वादिसंबंधावच्छिन्नप्रतियोगिताकोऽभावोऽनुमितिजनकतावच्छेदककोटिप्रविष्टव्याप्यप्रकारितायां निवेश्यं तेन तथा च तावदभाव
कूटविशिष्टव्याप्यप्रकारिताशालिनिर्णयत्वेनानुमितिं प्रतित्वेकेवह्निहेतुताकल्प्यते धूमपरामर्शकाले आलोकाभाववति आलोकप्रका
रके पित्तत्राप्रामाण्यग्रहसत्वेनानुमित्यनुपपत्तिः आलोकाभाववद्वह्निविशेष्यतानिनिरूपितत्वप्रकारतानिरूपितविशेष्यतावच्छेदकालो
कप्रकारितात्वसंबंधेनाप्रामाण्यग्रहस्यान्तरीयव्याप्यप्रकारितायाममभावेन तथाविधाप्रामाण्यग्रहाभावकूटस्य तत्र सत्वादिति वा
च्यं तथा सति तादृशाभावकूटस्य परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेण कारणतानंत्यादवच्छेदकगौरवाच्च न च तावत्त्व
भावेषु व्यासज्यवृत्तिमेकां कारणतावच्छेदकतावच्छेदकतां पर्याप्य कारणतावच्छेदकत्वयोरैक्यमुपपादनीयमिति वाच्यं अवच्छेदक

२७ 27 तायाव्यासज्यवृत्तित्वस्यासम्भवदूषितत्वेन तथा वक्तुमशक्यत्वात् यत्तु निखिलाप्रामाण्यग्रहाणां किंचिद्धर्मावच्छिन्नाभाववद्विशेष्यतानिरू-
पितत्वप्रकारतानिरूपिप्रकारित्वनिष्ठविशेष्यतानिरूपितनिरूपितनिरूपितसंबंधावच्छिन्नावच्छेदकतावच्छेदकधर्मावच्छिन्नत्वसंबंधाव-
च्छिन्नज्ञानत्वावच्छिन्नप्रतियोगिताकएवाभावो व्याप्यप्रकारिकायां निवेश्यत इति नानाविधाप्रामाण्यग्रहाभावनिवेशानुरोधेन हेतुताव-
च्छेदकभेदेन कार्यकारणभावभेद इति तदप्यसत् तथा सत्यालोकाभाववति धूमप्रकारकमिति प्रामाण्यग्रहदशायां धूमपरामर्शादनुमि-
त्यनुदयप्रसंगात् तादृशविशेष्यतावच्छेदकतावच्छेदकधर्मस्यैव प्रकारित्वनिष्ठविशेष्यतानिरूपितनिरूपितत्वप्रकारतानिरूपितविशे-
ष्यत्वप्रकारतानिरूपिताधिकरणप्रकारतानिरूपिताभावप्रकारतानिरूपितप्रतियोगिप्रकारतावच्छेदकत्वस्याधिकस्य निवेशने च धूमाभाव-
वति आलोकप्रकारकमालोकाभाववति धूमप्रकारकं चेदमिति प्रामाण्यग्रहकाले धूमपरामर्शादनुमित्युत्पादनासंभवात् धूमत्वस्य तन-
ज्ञानीयतादृशप्रतियोगिप्रकारतावच्छेदकत्वात् तथाविधविशेष्यतावच्छेदकतावच्छेदकत्वाच्च किंच घटदत्तानेऽनीतधूमपरामर्शे वाऽप्रा- एम०
माण्यग्रहसत्त्वे विद्यमानधूमपरामर्शादेतन्मतेऽनुमित्यनुपपत्तिरिति न किंचिदेतदिति चेन्न यद्वा विशेष्यतानिरूपितप्रकारतावच्छिन्नत्वेनेव २७

परामर्शस्यानुमितिहेतुत्वं प्रकारतावत्त्वं च व्याप्यत्वधर्मितावच्छेदकतामच स्वावच्छेदकधर्मविशिष्टप्रकारित्वप्रकारितानिरूपितविशेष्य
तासामानाधिकरण्योभयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्त्वस्वनिरूपकत्वोभयसंबंधेन प्रकारतायां तथाविधधर्मवैशिष्ट्यं
स्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वावच्छिन्नत्वस्वावच्छिन्ननिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकत्वोभयसंबंधेन बोध्यं धूमपरामर्श
काले इदं ज्ञानं चालोकाभाववद्विशेष्यतानिरूपितालोकप्रकारताशालीत्यप्रामाण्यग्रहसत्त्वे नानुमित्यनुपपत्तिस्तत्र व्याप्यत्वधर्मितावच्छे
दकतापन्नस्वावच्छेदकीभूतधूमत्वविशिष्टप्रकारतानिरूपितविशेष्यत्वस्य तादृशपरामर्शेऽसत्त्वेन तद्वृत्तित्वोभयसंबंधावच्छिन्नप्रतियो
गिताकज्ञानाभाववत्त्वस्य तज्ज्ञाने न च सत्त्वात् एवं घटज्ञानाशावद्धीतनधूमपरामर्शे वाऽप्रामाण्यग्रहसत्त्वे विद्यमानधूमपरामर्शादितोऽप्यनु
मित्युत्पत्तेर्न किंचिद्बाधकं तत्रापि व्याप्यत्वधर्मितावच्छेदकतापन्नस्वावच्छेदकीभूतधूमत्वादिविशिष्टप्रकारतानिरूपितविशेष्यत्वस्य विद्य
मानेधूमपरामर्शेऽभावेन तदुभयोभयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्त्वस्य तादृशपरामर्शेऽसत्त्वात् स्वावच्छिन्नाभाववद्विशेष्यता
निरूपितत्वावच्छिन्नत्वं च स्वनिष्ठावच्छेदकतानिरूपितायाप्रतियोगितासंसर्गावच्छिन्नावच्छेदकतातन्निरूपितायाश्चाभावनिष्ठावच्छेदकतातन्नि

२८ रूपिताधिकरणतानिष्ठावच्छेदकतानतन्निरूपितविशेष्यत्वनिष्ठावच्छेदकतानिरूपितानिरूपितत्वनिष्ठावच्छेदकतानिरूपकत्वं वा सत्त्व स्वावच्छि
28 न्नाभावादिनिवेशे धूमाभाववत्तादिनाः भ्रांतानवच्छिन्नप्रामाण्यज्ञानास्कंदितपरामर्शादनुमित्यापत्तेः स्वनिष्ठावच्छेदकता च स्वनिरूपकावच्छे
दकतानिरूपितत्वसंबंधेन व्याप्यत्वनिष्ठावच्छेदकतान्यावच्छेदकताविशिष्टं यत्त्वं तदन्यायात्तथा तेन नीलधूमत्वस्य धूमत्वानतिरेकितया
नीलधूमाभाववति धूमप्रकारकमितेतादृशज्ञानीयप्रकारित्वप्रकारतायाः अपि धूमत्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वावच्छिन्नत्वव
त्त्वे पि न तादृशज्ञानकालीनधूमपरामर्शादनुमित्यनुपपत्तिः व्याप्यत्वनिष्ठावच्छेदकतामात्रस्यावच्छेदकतायां निवेशाच्च वह्निव्याप्यधूमा
भाववति वह्निव्याप्यधूमप्रकारकमितिप्रामाण्यग्रहकालेन धूमपरामर्शादनुमित्यापत्तिः नचैवमपि वह्निव्याप्यधूमाभाववति धूमप्रकारक
मित्याकारकज्ञानस्य नीलधूमाभाववति धूमप्रकारकमित्यादिसमशीलतयाः प्रामाण्यज्ञानानात्मकत्वात्तत्कालीनधूमपरामर्शादुत्पद्य
मानायाः सर्वसंमतानुमितेरनुपपत्तिः तत्र धूमत्वनिष्ठावच्छेदकतायाः स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन व्याप्यत्वनिष्ठावच्छेदक एम.
तान्यापानीय वह्निनिष्ठावच्छेदकतानतिविशिष्टान्यत्वादिति वाच्यं तादृशस्थलेऽनुमितेस्तत्पादकस्य प्रामाणिकत्वे स्वावच्छिन्ननिरूपितत्वसंबंधावच्छि २८

त्वावच्छेदकनकितत्वेन त्वावच्छेदकतायां साध्यव्याप्यतावच्छिन्नत्वस्यापि निवेशनीयत्वात् व्याप्यत्वाविषयकाणां धूमाभाववत्तिद्धूमप्रकारकमि-
त्याद्यप्रामाण्यग्रहाणां च दृष्टप्रतिबन्धकाभावे निवेशनीयाः तत्र च साध्यतावच्छेदकताविशिष्टान्यत्वमेव स्वनिष्ठावच्छेदकतायां निवेशनीयं न त्वव-
च्छेदकतांशे व्याप्यत्वनिष्ठावच्छेदकतान्यत्वमपि प्रयोजनविरहात् एवं स्वावच्छिन्ननिरूपितत्वसंबन्धावच्छिन्नावच्छेदकताकत्वमपि स्वावच्छे-
दकतायां साध्यव्याप्यतावच्छिन्नत्वं न च निवेशनीयं जातिविशेषवदभाववति धूमप्रकारकमित्यादिज्ञानकाले धूमादिपरामर्शादनुमित्स-
त्त्वात् स्वनिष्ठावच्छेदकतायां निरवच्छिन्नत्वमपि निवेशनीयं नीलधूमाभाववति धूमनीलधूमप्रकारकजातिविशेषवदभाववति जातिविशेष-
वत्प्रकारकमित्याद्यप्रामाण्यग्रहाणामभावस्य च वह्निव्याप्यनीलधूमवान्पर्वतः वह्निव्याप्यजातिविशेषवान्पर्वत इत्यादिपरामर्शाणां
सत्वे तत्र हेतुतायामेव निवेश्यत इति न तत्र तदप्रामाण्यग्रहदशायां तज्जन्यपरामर्शादनुमित्सापत्तिः अथ वह्निव्याप्यालोकवानयं पर्वतः पर्वतो
वह्निव्याप्यधूमवांश्चेति समूहालंबनसत्वे तत्र चेदृशज्ञाने धूमाभाववान् इति धूमप्रकारकमित्यप्रामाण्यग्रहे पर्वतो वह्निमानित्यनुमित्सापत्तिरिति चे-
न्नादृशपरामर्शस्य व्याप्यताधर्मितावच्छेदकतापन्नस्यावच्छेदकीभूतालोकत्वविशिष्टप्रकारित्वप्रकारतानिरूपितविशेष्यत्वघटितोभयस-

२९ 29 बंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्त्वस्वनिरूपकत्वेतदुभयसंबंधेनफलविशेष्यतानिरूपितालोकनिष्ठप्रकारतावत्त्वात्तत्स्यधूमत्वावच्छिन्ना
भावप्रकारकतयास्वनिष्ठप्रकत्स्नप्रतियोगितावच्छेदकताकभेदवत्त्वस्वावच्छिन्नव्याप्यतावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताक
त्वोभयसंबंधेनधूमत्वरूपप्रकारविशिष्टत्वेनतथाविधनिर्णयस्यापितत्रसत्त्वाच्चेतिचेन्न स्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वपर्वतत्वा
वच्छिन्नविशेष्यतानिरूपितस्वावच्छिन्नव्याप्यतावच्छिन्नप्रकारताकत्वेतदुभयसंबंधेनप्रकारविशिष्टज्ञानत्वेनैवानुमितिंप्रतिहेतुत्वमुच्यते
तादृशप्रकारतावत्त्वंचतथाविधोभयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्त्वस्वनिरूपकत्वोभयसंबंधेनबोध्यं एवंचोक्तस्थलेनानुमि
त्यापत्तिःसंभवतितादृशपरामर्शेऽप्यालोकत्वनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकताभेदवत्त्वरूपसंबंधस्यासत्त्वेनस्वपदेनालोकत्वस्यधर्तु
मशक्यतयाधूमत्वस्यैवधर्तव्यत्वेनतदवच्छिन्नप्रकारतायास्तथाविधोभयसंबंधस्यचतत्राभावादिति केचित्तु उपदर्शितोभयसंबंधेनप्रकार
विशिष्टज्ञानत्वरूपनिर्णयत्वशरीरस्यद्वितीयसंबंधविधयाघटकीभूततायाःस्वावच्छिन्नप्रकारतात्वनिखिलांशमात्रप्रकारताःस्वावच्छिन्ना राम०
भाववद्विशेष्यकत्वावच्छिन्नत्वप्रकारतानिरूपितत्वस्वावच्छिन्ननिरूपितत्वसंबंधेनच्छिन्नावच्छेदकताकत्वोभयसंबंधेनकिंचिद्धर्मविशिष्टप्र २९

कारित्वप्रकारतात्वेनानुगमय्य ज्ञानीयतादृशप्रकारतानिष्ठप्रकारतायाः स्वनिरूपितनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतावच्छेदकधर्मावच्छिन्नत्वस
निरूपितविशेष्यतानामप्रज्ञाननिष्ठनिरूपितत्वसंबंधावच्छिन्नप्रतियोगिताकाभाववत्वोभयसंबंधेनोभावो निवेश्यत शेषं पूर्ववत् एवं च न काप्यनुपप
त्तिरित्याहुः ॥ ननु तथापि धूमालोकनिखिलपरामर्शाणां एकरूपेणानुमितिहेतुत्वे सिद्धिकाले धूमलिंगकेच्छासत्वे सति वालोकलिंगकपरामर्शे धू
मलिंगकपरामर्शं विनैव धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावरूपकारणबलात् धूमलिंगकानुमित्यापत्तिः एतन्मते धूमपरामर्शत्वादीनामनुमि
तिजनकतानवच्छेदकतया तादृशसिद्ध्यभावेन फलजननेतरावच्छिन्नस्य सहकारित्वविरहेण वह्निव्याप्यवत्तानिर्णयत्वावच्छिन्नस्यैव सहकारितया
तदवच्छिन्नस्यालोकपरामर्शस्यैव तत्र सत्वात्तस्य च तत्सहकारिणा ह धूमलिंगकानुमितित्वाद्यवच्छिन्नं प्रति धूमलिंगकपरामर्शत्वादिना हेतुत्वमवश्यं
कल्पनीयं एवं च हेतुतानवच्छेदकभेदेन परामर्शकारणतादिबाहुल्यं भवन्मतेपि तुल्यमिति चेन्न धूमलिंगकानुमितित्वाद्यवच्छिन्नं प्रति धूमलिंग
केच्छाविरहविशिष्टसिद्ध्यभाववत्वादिना नानपह्नतया हेतुत्वे च तथा सति लिंगभेदेनानंतकार्यकारणभावकल्पने गौरवात्किंतु सामान्यतः पर्वतो
देश्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रति वह्निव्याप्यवत्तानिर्णयविशिष्टसिद्ध्यभाववत्वादिनैकमेव हेतुत्वमुच्यते वह्निव्याप्यवत्तानिर्णयवि

३० शिष्टत्वं च व्याप्तिधर्मितावच्छेदकतापन्नपक्षविशेष्यतानिरूपितस्वप्रकारतावच्छेदकधर्मावच्छिन्नलिंगकत्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्य
30 ताकत्वस्वसामानाधिकरण्योभयसंबंधेन। धूमादिमात्रलिंगकत्वप्रकारकेच्छावैनेतादृशोभयसंबंधेनालोकलिंगकपरामर्शविशिष्टेति न तथा
विधेच्छाकाले सिद्धिसत्वे आलोकव्याप्यपरामर्शादनुमित्यापत्तिरिति धूमपरामर्शत्वादिना कारणकल्पने विनेतोपपत्तिरिति अत्र च स्वावच्छिन्नलिंग
कत्वप्रकारतानिरूपितात्वस्वभिन्नधर्मावच्छिन्नालिंगकत्वप्रकारतानिरूपितत्वोभयसंबंधेन किंचिद्धर्मविशिष्टान्यत्वं तादृशानुमितिनिष्ठवि
शेष्यतायां निवेशनीयं अन्यथा एकत्र द्वयमिति रीत्या एकविशिष्टे परवैशिष्ट्यमिति रीत्या वाधूमलिंगकत्वोभयप्रकारकानुमित्साकाले
सिद्धिसत्वेन तथाविधैकमात्रलिंगकपरामर्शादप्यनुमित्यापत्तेः अयं वह्निव्याप्यालोकवान्न वा पर्वतः पर्वतो वह्निव्याप्यधूमवानित्याकारकनिर्ण
यदशायां सिद्धिसत्वे आलोकमात्रलिंगकेच्छासत्वे पर्वतो वह्निमानित्यनुमित्यापत्तिः तादृशेच्छायां तथाविधत्वात्स्यव्याप्यत्वधर्मितावच्छेदक
तापन्नस्वप्रकारतावच्छेदकधर्मालोकत्वावच्छिन्नलिंगकत्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताकत्वरूपसंबंधस्य सत्वेन तत्स्वघटितोभ राम०
यसंबंधेन तादृशेच्छाया वह्निव्याप्यवत्ताज्ञानविशिष्टत्वात्स्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्स्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारतानिरूपि ३०

नपर्वतत्वावच्छिन्नविशेष्यताकत्वोभयसंबंधेनधूमत्वरूपप्रकारविशिष्टत्वेनतादृशज्ञानस्यानुमितिजनकतावच्छेदकीभूततयाविषयनिष्ठपत्वाव
च्छिन्नत्वाच्चेतिचेन्नव्याप्यत्वधर्मितावच्छेदकतापन्नपक्षविशेष्यतानिरूपितस्वप्रकारतावच्छेदकस्वनिष्ठभेदप्रतियोगितानिरूपितसावच्छिन्नाभा
वप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नावच्छेदकतोभयसंबंधेनस्वविशिष्टधर्मावच्छिन्नलिंगकत्वप्रकारतानिरूपि
तपूर्वोपदर्शितोभयसंबंधेनकिंचिद्धर्मविशिष्टानुमितिनिष्ठविशेष्यताकत्वस्वसमानाधिकरण्योभयसंबंधेनवह्निव्याप्यवत्तानिर्णयादिवि
शिष्टत्वस्येच्छायांनिवेशात् अत्रप्रथमस्वपदद्वयंवह्निव्याप्यवत्तानिर्णयपरं द्वितीयस्वपदंचसंशयाहार्यभावप्रतियोगितावच्छेदकत्वेनभासमा
नधूमत्वादिरूपधर्मपरं एवंचोक्तस्थलेनानुमित्यापत्तिस्तत्रतादृशज्ञानस्यसावच्छिन्नाभावप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्य
ताकत्वसंबंधेनालोकत्ववत्तयातद्रूपस्यतत्रासत्वेनालोकत्वस्यातथात्वात्धूमत्वस्यैवतादृशतयातदवच्छिन्नलिंगत्वप्रकारकत्वस्यतथाविधेच्छा
यामभावेनतादृशेच्छायाः उपदर्शितोभयसंबंधेनव्याप्यवत्तानिर्णयविशिष्टत्वाभावात् ननूक्तरूपेणसिद्ध्यभावस्यकारणत्वेकेऽनुमितिर्जाय
तामित्याद्यननुगतेच्छानांतत्तद्व्यक्तित्वेनैवोत्तेजकतयानिखिललिंगकपरामर्शकालीनतादृशेच्छाभावकूटस्यैकत्रनिवेशेननतस्यपास्यंविशेष्यति

३१ शेषणाभावे विनिगमनाविरहःप्रयुक्तकार्यकारणभावानंत्यप्रसंगः लिंगभेदेन कारणताभेदे तु तत्तल्लिंगकपरामर्शकालीनतादृशेच्छानामभा-
31 वसमुदायस्य तत्तल्लिंगकानुमितिकारणतावच्छेदककोटावेव निवेशेन तत्तल्लिंगकपरामर्शकालीनतादृशेच्छानामभावसमुदायस्य तत्तल्लिं-
गकपरामर्शकालीनतादृशेच्छानामभावसमुदायस्य चैकत्वानिवेशात्तत्तस्य तस्य च परस्परं विशेष्यविशेषणभावप्रयुक्तकार्यकारणभावानं-
त्यप्रसंगाभावाल्लाघवं न च तादृशानुगतेच्छानामनुमितित्वप्रकारकेच्छात्वाद्यनुगतरूपेणोत्तेजकत्वात्तद्दोष इति वाच्यं तथा सति घ-
टाद्यनुमितिसामग्रीसत्त्वे पर्वतो वह्निमानिति सिद्धिसत्त्वे वह्निव्याप्यधूमादिमत्तानिर्णयदशायामनुमितिर्जायतामितीच्छानंतरं पर्वतो वह्निमानि-
त्यनुमित्यापत्तेः न चेष्टापत्तिः नहींनीतादृशसिद्धिप्रतिबंधीभूतघटाद्यनुमितिसत्त्वे एव तथाविधेच्छाविषयसिद्ध्या इष्टापत्तेरयोगात् तासां
तत्तद्व्यक्तित्वेनोत्तेजकत्वे तु नोक्तदोषः घटाद्यनुमितिसामग्रीकालीनानुमितिर्जायतामितीच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन पर्वतो वह्निमानि-
तिसिद्धिप्रतिबंधकतायामुत्तेजकत्वानभ्युपगमेन तदानींतथाविधेच्छाभावकूटविशिष्टोपदर्शितसिद्धिरूपप्रतिबंधकसत्त्वेन वह्न्यनुमित्यापादना- एप्र०
संभवादिति चेन्न नानासामग्र्यनुमितित्वप्रकारकेच्छात्वाद्यनुगतरूपेणोत्तेजकत्वात् न चोक्तदोषः घटाद्यनुमितिसामग्रीसमवधानकालीनेच्छानां ३१

तत्र यद्धर्मित्वेन यन्निबंधकत्वाभ्युपगमात् पुरस्तेनैवैतत् अन्यथा तादृशेच्छानां तत्र यद्धर्मित्वेनोत्तेजकत्वे लिंगभेदेन कारणताभेदे ऽपि तल्लिंगकपरा
मर्शकालीनतादृशेच्छानामभावसमुदायस्य तस्य लिंगकपरामर्शकालीनतादृशेच्छानामभावसमुदायस्यैवैकत्वान्निवेशेन तस्य तस्य च परस्प
रं विशेष्यविशेषणभावे व्यप्तयुक्तकार्यकारणभावानंत्यप्रसंगाभावे ऽपि तल्लिंगककपरामर्शकालीनतादृशेच्छानामेव तत्तद्धर्मित्वेनाभावसमु
दायत्वेन लिंगकानुमितिकारणतायां निवेशेन तस्य परस्परं विशेष्यविशेषणभावे विनिगमनाविरहप्रयुक्तकार्यकारणभावानंत्यप्रसंगे ऽप्यनु
वीरत्वादिति एवं च साध्याभाववद्वृत्तित्वरूपव्याप्त्यवगाहिपरामर्शहेतुतामते हेत्वभावच्छेदकभेदेन परामर्शहेतुतामते ऽप्यनुमितिसामग्रीप्र
तिबंधकतायाः स्वभेदाभावप्रयुक्तलाघवमखंडितमेवेति स्यादेतत् परिष्कृतरीत्या धूमालोकादिनिखिलपरामर्शानामेकरूपेण हेतुत्वसंभवे
ऽसाध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञाने हेतुतामते तेन निरूपितत्वनिर्वचनाद्युत्तरोधे न हेतुतावच्छेदकानां विशिष्यनिवेशस्यावश्यकत्वं तदा व्याप
कसामानाधिकरण्यरूपव्याप्तिज्ञानहेतुतामते ऽपि तन्निवेशनं विनैव सर्वेषामुपपादयितुं शक्यत्वेन तथा हि स्वविशिष्टव्यापकसामानाधिक
रण्यविशेष्यतावच्छेदकतापन्नस्वावच्छिन्नत्वसंबंधेन किंचिद्धर्मविशिष्टप्रकारतात्वेन पक्षविशेष्यतानिरूपितनिखिलहेतुप्रकारतानुगम

शर्मा

३२ प्यतन्निरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताशालिनिर्णयत्वेनैव हेतुतमुच्यते धूमव्यापकवह्निसमानाधिकरणालोकवान्पर्वत इत्यादिनिर्णयस्य
न ताहृशसंबंधेन केनापि धर्मेण विशिष्टः ताहृशज्ञानीयपर्वतत्वावच्छिन्नविशेष्यतानिरूपितप्रकारताया आलोकत्वावच्छिन्नसत्वेपि व्या
लोकत्वविशिष्टव्यापकसामानाधिकरण्यविशेष्यतावच्छेदकत्वस्यालोकत्वेऽसत्वेन स्वपदेनालोकत्वस्योपादातुमशक्यत्वात् पर्वतत्वा
वच्छिन्नविशेष्यतानिरूपितप्रकारतायां धूमत्वावच्छिन्नत्वविरहेण स्वपदेन धूमत्वस्याप्युपादातुमसंभवाच्च स्वविशिष्टव्यापकसामानाधिकर
ण्यविशेष्यतावच्छेदकत्वं च स्वनिष्ठावच्छेदकतानिरूपिकायां हेतुप्रकारतान्निरूपिताधिकरणप्रकारतानिरूपिताधेयत्वप्रकारतानिरू
पिताभावप्रकारतानिरूपितप्रतियोगित्वप्रकारतानिरूपितावच्छेदकत्वप्रकारतानिरूपिताभावप्रकारतानिरूपितवह्नित्वप्रकारतानिरू
पितावच्छिन्नत्वप्रकारतानिरूपितवह्निप्रकारतानिरूपिताधिकरणप्रकारतानिरूपिताधेयत्वप्रकारतानिरूपितविशेष्यतावच्छेदकत्वं।
तेनेंधनव्यापकवह्निसमानाधिकरणेंधनवान्पर्वत इत्यादिज्ञानस्य तादृशवह्निनिष्ठेंधव्यापकत्वस्याप्रसिद्ध्या तदनवगाहित्वेपि न क्षतिः। रा॰म॰
नीलधूमव्यापकवह्निसमानाधिकरणधूमवान्पर्वत इत्यादिज्ञानवारणाय पर्वत्वानिष्ठावच्छेदकतायां स्वनिरूपकप्रकारतानिरूपितत्वसंबंधेना ३२

32

वच्छेदकताविशिष्टान्यत्वमपि निवेशनीयं नीलधूमत्वावच्छिन्नलिंगकपरामर्शादीनां चैवमन्यतरत्वमन्यतेपि पृथगेव हेतुता स्वीक्रियते एवं ज्ञा
नविशेषविशिष्टव्यापकवह्निसमानाधिकरणधूमवान्पर्वत इत्यादिज्ञानवारणाय स्वनिष्ठावच्छेदकतायां निरवच्छिन्नत्वमपि निवेश्यं ज्ञानविशे
षत्वादिना धूमत्वादिलिंगकतावच्छेदकस्थले च पृथगेव हेतुत्वमुच्यते एवमन्यतेपि तत्र पृथगेव हेतुतापावकव्याप्तत्वात् एवं धूमसमानाधि
करणघटाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणधूमवान्पर्वत इति ज्ञानवारणाय विधेयत्वनिष्ठप्रकारतायां स्वनि
रूपकप्रकारतानिरूपितत्वसंबंधेनाभाववत्त्वान्यनिष्ठप्रकारताविशिष्टान्यत्वमपि निवेशनीयमिति अथ तथाप्येतन्मते स्वनिरूपितावच्छि
न्नविधेयतावच्छेदककोनुमितेरनुपपत्तिः तथाहि एतन्मते धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकर
णधूमवान्पर्वत इत्यादिज्ञानस्यानुमितिहेतुत्वमंगीकार्यं तत्र च वह्नित्वत्वादिना वह्नित्वे हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वा
वगाहनात्तदुत्तरं च वह्नित्वत्वादिरूपेण वह्नित्वविधेयतावच्छेदककानुमितिरेवोत्पत्तुमर्हति परामर्शस्य यद्रूपावच्छिन्नसाध्यतावच्छेदके हे
तुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वावगाहित्वं तद्रूपपुरस्कारेणैव साध्यतावच्छेदकावगाह्यनुमितिजनकत्वमिति नियमस्या

३३ वश्यमंगीकर्तव्यत्वात् अन्यथा धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकजातिमत्समानाधिकरणधूमवान्पर्वत इत्याहिताना द
पि पर्वतो वह्निमान् इत्यनुमित्यापत्तेः नच जातित्वावच्छिन्नेतादृशप्रतियोगितानवच्छेदकत्वावगाहितानस्य जातित्वावच्छिन्नविधेयतावच्छेद
कताकानुमितिं प्रत्येव हेतुत्वं वह्नित्वाद्यवच्छिन्नेतादृशप्रतियोगितानवच्छेदकत्वावगाहितानस्य तु स्वरूपतो वह्नित्वविधेयतावच्छेदककानु
37 नुमितित्वमेव जन्यतावच्छेदकमिति तथाविधपरामर्शात्तादृशानुमित्युत्पत्तौ न किंचिद्बाधकमिति वाच्यं तथासति वह्नित्ववत्तानिरनुमिते
र्विलयप्रसंगात् नच तथाविधानुमितित्वमपि जन्यतावच्छेदकमिति वाच्यं अप्रसति बाधके नियमतः पर्वतो वह्निमान्वह्नित्ववत्त्वाच्चेति
द्विविधविषयताशाल्यनुमित्यापत्तेः। साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानहेतुतामते च परामर्शे अभावप्रतियोगितावच्छेदकतया
या वह्नित्वादेर्भानं तथैवानुमितावपि वह्नित्वादेर्भानमिति न काप्यनुपपत्तिरिति चेन्न। सामानाधिकरण्यनिरूपकतावच्छेदकतया स्वरू
पतो वह्नित्वावगाहिधूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणधूमवान्पर्वत इत्याकारकः परा एम०
मर्शः स्वरूपतो वह्नित्वविधेयतावच्छेदककानुमितौ हेतुः सामानाधिकरण्यनिरूपकतावच्छेदकतया वह्नित्वत्वरूपेण वह्नित्वावगाहितो धूम ३३

समानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्ववत्समानाधिकरणधूमवान्पर्वत इति परामर्शस्य च वह्नित्वत्वावच्छिन्नविधेयतावच्छेदकतानाक्रा
नुमितिं प्रत्येव हेतुत्वं एवमन्यत्रापीति नक्वाप्यनुपपत्तिः नन्वास्तु स्वावच्छिन्नत्वसंयोगादिसंबन्धावच्छिन्नत्वोभयाभाववद्धेतुसमानाधिकरणाभावप्र
तियोगितासामान्यकवह्नित्वावच्छिन्नसमानाधिकरणधूमवत्वादिरूपैव व्याप्तिर्निर्विकल्पकव्यानत्र च स्वपदार्थस्य वह्नित्वादेर्यथानिवेशस्तथैवानुमितौ
विषयत्वे व्यभिचारज्ञानप्रतितादृशप्रतियोगिताधर्मिकतद्रूपवत्ताज्ञानमिति नानुपपत्तिलेशोपीत्याहुः केचित्तु अनवच्छेदकांशे निर्धर्मिता
वच्छेदकपरामर्शः स्वरूपतो वह्नित्वादिविधेयतावच्छेदककानुमितौ हेतुः वह्नित्वत्वाद्यवच्छिन्नविधेयतावच्छेदकताकानुमितौ च वह्नित्वत्वाव
च्छिन्नेः नवच्छेदकत्वावगाही परामर्श इति नानुमितेर्निष्प्रकारकत्वे द्विविधविषयताशालित्वप्रसंगः न चानवच्छेदकत्वांशे निर्धर्मितावच्छेदकबो
धस्य व्यभिचारज्ञानाप्रतिबध्यत्वेन तस्यानुमितिहेतुत्वे व्यभिचारस्य हेत्वाभासत्वानुपपत्तिरिति वाच्यं निर्धर्मितावच्छेदकबोधस्य सधर्मिता
वच्छेदकज्ञानाप्रतिबध्यत्वेपि निर्धर्मितावच्छेदकज्ञानप्रतिबध्यतया निर्धर्मितावच्छेदकस्ववह्नित्वविशेष्यकहेतुसमानाधिकरणाभावप्रतियो
गितावच्छेदकत्वप्रकारकग्रहात्मकस्यैव व्यभिचारज्ञानस्य तादृशपरामर्शप्रतिबन्धकतायाः स्वीकृतत्वेन व्यभिचारस्य हेत्वाभासत्वोपपत्तेः धर्मिताव

३५ छेदकभेदेनप्रतिबध्यप्रतिबंधकभावस्याभिन्नतयाप्रवृत्तेर्निर्धर्मितावच्छेदकबोधसाधारण्यस्यवह्नित्वत्वातिरिक्तधर्मानवच्छिन्नविशेष्यताकत्वरूप
स्यैववह्नित्वत्वावच्छिन्नविशेष्यताकत्वस्यव्यभिचारज्ञानप्रतिबध्यतावच्छेदककोटिप्रविष्टतयोक्तदोषाभावाच्चेतिवदंति ननुतथापिव्यापक
34 त्वस्यस्वप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकत्वरूपत्वेतत्रचस्वपदंनाभावसामान्यपरं अभावसामान्यप्र
तियोग्यनधिकरणीभूतहेत्वधिकरणस्यसर्वत्राप्रसिद्धेः किंतुतत्पदंतत्तदभावपरमेव तथाचचतत्तदभावप्रतियोग्यनधिकरणहेत्वधिकरण
वृत्तित्वाभावप्रतियोगितावच्छेदकभेदकूटवत्साध्यतावच्छेदकत्वमेवप्रवृत्तेव्यापकत्वमितिपर्यवसन्नं एवंचभेदकूटस्यप्रातिस्विकरूपेण
ज्ञानंयुगसहस्रेणापिनसंभवतीतिव्यापकसामानाधिकरण्यरूपव्याप्तेर्दुर्ज्ञेयतयाकथमनुमितौतज्ज्ञानंहेतुता। नचसामान्यतोहेतुसमाना
धिकरणाभावप्रतियोगितावच्छेदकप्रतियोगिकभेदत्वादिनाज्ञानसंभवाच्चतादृशव्याप्तेर्दुर्ज्ञेयत्वमितिवाच्यं व्यभिचारज्ञानाप्रतिबध्यतया
तादृशसामान्यरूपेणज्ञानस्यानुमित्युपयोगित्वात् नचसाध्याभाववदवृत्तित्वरूपव्याप्तावपिसाध्याभावेस्वप्रतियोग्यनधिकरणवृत्तित्वस्य राम०
निवेशनीयतयातुल्यमिदंदूषणमितिवाच्यं तत्रप्रतियोगिपदस्यसाध्यपरत्वेनाननुगमाभावादितिचेदत्रकेचित्स्वप्रतियोग्यनधिकरणहेत्वधि ३५

करणावृत्तिमदभावो यस्तस्य स्वनिरूपकाभावनिरूपितत्वस्यावच्छेदकावच्छिन्नाधिकरणानुयोगिकत्वोभयसंबंधेन प्रतियोगिना विशिष्टान्यायाहे
त्वधिकरणनिष्ठाधिकरणतानिरूपकाभावेऽसमर्थकतया स्वानुगमाभावेनाऽनुपपत्तेश्च भावः संयोगी द्रव्यत्वादित्यादौ रोचनाव्याप्तिस्तत्र द्रव्या
दिनिष्ठसंयोगाभावाधिकरणतायास्तथाविधोभयसंबंधेन संयोगत्वावच्छिन्नप्रतियोगिताविशिष्टत्वेन तदवच्छेदसंयोगत्वावच्छिन्नाधिकरणानुयो
गिकत्वस्य तन्निरूपकसंयोगाभावादिनिरूपितत्वस्य च सत्त्वात् किं तु तादृशोभयसंबंधेन प्रतियोगिना विशिष्टान्याहेत्वधिकरणनिष्ठाधिकर
णताघटाभावाद्यधिकरणतैव तन्निरूपकघटाद्यभावप्रतियोगितावच्छेदकत्वस्य संयोगत्वे सत्त्वात् संयोगी सत्त्वादित्यादौ रोचनातिव्या।
प्तिः न च गुणाद्यात्मकहेत्वधिकरणावृत्तिसंयोगाभावाधिकरणताया अपि तादृशोभयसंबंधेन प्रतियोगिना विशिष्टान्यत्वात् अधिकरणा
भेदेनाधिकरणताभेदस्य सर्वैरेव स्वीकृतत्वादिमाङ्कस्तचिह्नं उपदर्शितोभयसंबंधेन प्रतियोगिना विशिष्टान्यायाहेत्वधिकरणनिष्ठा
धिकरणतायास्तस्याः सर्वत्रैवाप्रसिद्धेः सर्वस्यैवाधिकरणतायाः उपदर्शितोभयसंबंधेन स्वेत्तणावृत्तित्वविशिष्टत्वाभावरूपप्रतियोगिनिष्ठप्र
तियोगिताविशिष्टत्वात् यद्यपि हेत्वधिकरणनिरूपितनिरवच्छिन्नवृत्तित्वमेवाभावविशेषणमुच्यते तेन तु प्रतियोग्यनधिकरणावृत्तित्वं एवं च

३५ प्रतियोग्यनधिकरणहेतुनिष्ठत्वस्य व्यापकसामानाधिकरण्यरूपव्याप्तिशरीरे प्रवेशात्तस्यानुगमसंभावनेति तदपि न तथा सति कालिकसंबंधा
35 वच्छिन्नप्रतियोगिताकाकाशाभावाद्यभाववत्यात्मत्वादिसाध्यकाव्याप्तिप्रसंगात् वस्तुतस्तु स्वनिरूपिकानुयोगिताविशिष्टनिरूपित
त्वस्यावच्छेदकविशिष्टाधिकरणानुयोगिकत्वोभयसंबंधेन प्रतियोगिताविशिष्टान्यत्वं साध्यवन्निष्ठसाध्याभावाधिकरणतापित्वं
वा हेतुमन्निष्ठाभावाधिकरणताविशेषणतेयमितिनानुगमसंभावना नव्यास्तु हेत्वधिकरणनिष्ठभेदप्रतियोगितावच्छेदकतावच्छेद
कावच्छिन्नत्वरूपमनुगतं प्रतियोगिवैयधिकरण्यनिरूपकत्वं प्रतियोगिविशेषणं देयं अथवा स्वावच्छेदकावच्छिन्नाधिकरणत्वसंबंधे
न हेत्वधिकरणनिष्ठप्रतियोगितावच्छेदकत्वत्वावच्छिन्नसामान्याभावघटितव्याप्तिज्ञानमेवानुमितिजनकमिति नानुगमदरिद्रः ।
अथ लघुरूपसमनियतगुरुरूपेण साध्यतायां व्यभिचारिण्यतिव्याप्तिवारणाय स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकहेतु
समानाधिकरणाभावप्रतियोगितावच्छेदकं यद्यत्त्वं तावद्भेदकूटविशिष्टसाध्यतावच्छेदकवत्त्वमेव व्यापकत्वमित्यवश्यं निर्वक्तव्यं तथा राम०
च तावद्भेदकूटज्ञानं पुरुषसहस्रेणापि न संभवतीति व्यापकसामानाधिकरण्यरूपव्याप्तेर्दुर्ज्ञेयत्वेनेति चेन्न साध्याभाववद्वृत्तित्वरूपव्याप्ति ३५

त्वानहेतुतामतेपिलघुसमनियतगुरुधर्मावच्छिन्नसाध्यकसद्धेतौ साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धाः व्याप्तेर्ग्रिणा
पसाध्यतावच्छेदकावच्छिन्नवह्निष्ठाभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नाभाववह्नित्वं विवक्षणीयं तत्र च साध्यतावच्छेदकावच्छिन्न
वह्निवृष्टाभावप्रतियोगितानवच्छेदकत्वेन साध्यतावच्छेदकावच्छिन्नवह्निष्ठाभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदवत्त्व
रूपतया सति लघुसमनियतगुरुधर्मावच्छिन्नसाध्यकसद्धेतावुक्ताव्याप्तेर्वारणासंभवात् तत्र प्रमेयवह्नित्वावच्छिन्नवह्निष्ठाभावप्रतियोगि
तावच्छेदकत्वादेः स्वसमनियतवह्नित्वावच्छिन्नवह्निष्ठाभावप्रतियोगितावच्छेदकत्वाद्यपेक्षया गुरुत्वेन भेदप्रतियोगितानवच्छेदकत्वा
न किंतु तन्नत्यतियोगितावच्छेदकव्यक्तौः भूंगत्वादिकं तत्पोपारापतावच्छेदकूटवत्त्वमेव न निर्वाच्यं तथा च तत्संबन्धेदकूटस्यपुगमहस्त्रेण
त्वानुमशक्यतयाभव्यमतेपि द्वहेयतादृप्रहोषाद्गुरुद्वरावगुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमनावलंबमेवावधेयासुस्यावसमा
प्तिः तस्माद्व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानहेतुतामपिहेतुतावच्छेदकभेदेन कार्यकारणभावानंत्यप्रसंगोरवादिरूपदो
षाभावेन न ज्ञानहेतुत्वं निराबाधमेवेति मैवं एवं सत्यपि व्यापकसामानाधिकरण्यरूपव्याप्तेर्गुरुशरीरतया तद्रूपेण साध्याभाववद्वृत्ति

३६ त्वरूपव्याप्तेर्लघुशरीरतयाशरीरलाघवप्रयुक्तलाघवस्यानपायेन तज्ज्ञानस्यैवानुमितिहेतुत्वौचित्यात् एतेन सर्वत्र साध्याभाववद्वृत्तित्वरू
७० पव्याप्तिज्ञानादेवानुमितिरितिनियमः परंतु कुत्रचित् साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानात् कुत्रचिच्च व्यापकसामानाधिकरण्य
रूपव्याप्तिज्ञानादपीत्यनियमपक्ष एव समीचीनः तथा सति सामानाधिकरण्यविशिष्टवह्निमत्पर्वतनिर्णयकालीनधूमव्यापकवह्निसमा
नाधिकरणधूमवान्पर्वतो वह्निमत्पर्वतवृत्तित्वघटितानित्साघानेनानुमितिसामग्रीणामनेन भिन्नविषयकप्रत्यक्षादिकं प्रतिप्रतिबंधक
त्वाकल्पनेन लाघवसंभवात् ततरानीपर्वतविशेष्यकवन्ह्यभाववत्त्वानिर्णयात्मकबाधबुद्ध्यभावाप्रामाण्यज्ञानानास्कंदितसिद्ध्यभावादि
घटितव्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानघटितपर्वतोद्देश्यकवन्हिविधेयकानुमितिसामग्र्यास्तत्रावश्यकत्वात् तादृशसामग्र्यान्यभिन्न
विषयकप्रत्यक्षादौ प्रतिबंधकत्वस्य क्लृप्ततया ततरावनथाविशेषप्रत्यक्षाद्यनुत्पादोपपत्तेः नैवं सति व्यापकसामानाधिकरण्यरूपव्याप्ति
ज्ञानादेवानुमितिरस्त्वितोऽनन्तसाध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानादित्तिवाच्यं साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानादनुमितिसम्प्रगमे गण०
पि सामानाधिकरण्यविशिष्टवह्निमत्पर्वतनिर्णयकालीनवाह्न्यभाववद्वृत्तिमत्पर्वतो वह्निमत्पर्वतवृत्तिघटितानित्साघनेनानुमितिसामग्र्याभिन्नवि ३६

थपकमगस्य शरीरेप्रतिबंधकत्वाकल्पनेन लाघवं संभवात् एवं साध्याभावव्यापकाभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानस्याप्यनुमिति
हेतुत्वमुपेयते तथा सत्युक्तरीत्या लाघवसंभवात् नचैवं नानाविधव्याप्तिज्ञानानामनुमितिहेतुत्वे कतत्कारणतायां परस्परव्यभिचार इति वाच्यं
कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वसंबंधेन तत्तद्व्याप्तिज्ञानवैशिष्ट्यस्य निवेशनीयत्वादित्यपि परास्तं सामग्रीप्रतिबंधकत्वाकल्पनस्यापु
क्तलाघवस्य तुल्यत्वेपि शरीरलाघवमप्युक्तलाघवस्याधिकेन साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानस्यैवानुमितिहेतुत्वस्युक्तत्वात् न
नु शरीरलाघवात्साध्याभाववद्वृत्तित्वरूपव्याप्तेरेवानुमित्युपयोगित्वमुक्तं व्यापकतागर्भव्याप्तौ वह्नित्वादिरूपसाध्यतावच्छेदकाव
च्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वाभावस्य च तुल्यशरीरत्वेन शरीरलाघवाभावात् नच विशेषणाभ्यां भयमते तुल्यशरीरत्वेपि व्याप
कतागर्भव्याप्तौ साध्यसामानाधिकरण्यरूपाधिकस्य कांशस्य निवेशो गौरवं एतन्मते तन्निवेशे न लाघवमिति वाच्यं एतन्मतेपि पर्या
प्तिसंबंधेन घटादिसाध्यक घटपटोभयत्वादिहेतौ घटत्वाद्यभाववृत्तित्वस्य एकस्मिन्घटादौ घटपटोभयत्वादेः पर्याप्तिसंबंधेनावृत्तितया ति
व्याप्तिवारणाय साध्यतावच्छेदकसंबंधेन साध्याधिकरणे हेत्वतावच्छेदकसंबंधेन वृत्तित्वरूपसाध्यसामानाधिकरण्यस्यावश्यं निवेशनी

३७ यत्वादिति चेन्न समुदायस्य प्रत्येकानतिरिक्ततया प्रत्येकावृत्तेः समुदायावृत्तित्वनियमेन द्वित्वादेः पर्याप्तिसंबंधेन प्रत्येकस्मिन्नपि वृत्तितयोक्तरी
37 त्यातिव्याप्त्यभावेन साध्यसामानाधिकरण्यस्यानिविशनीयत्वात् नचैवमेकोन द्वावित्यतो बोधानुपपत्तिः एकस्मिन्नपि द्वित्वादिपर्याप्तेः स
त्वेन पर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदस्य बोधयितुमशक्यत्वादिति वाच्यं द्वित्वादिपर्याप्तेरुभयादिवृत्तिधर्मावच्छेद्यत्व
नियमेन तदनवच्छेदकैकमात्रवृत्तिधर्मावच्छेदेन तदुद्देस्यतद्वृत्तित्वे बाधकाभावात् अथैवं द्वित्वादेः पर्याप्त्याख्यविलक्षणसंबंध एव प्र
माणाभावः इमौ द्वावित्यादिप्रतीतेः समवायादिसंबंधविषयकत्वेनैवोपपत्तेः एको द्वावित्यादिप्रतीतेस्तु एकत्वादेर्द्वित्वाद्यनवच्छेदकत्वा
देवावारणात् अन्यथा पर्याप्त्यंगीकारेऽप्युक्तरीत्या तादृशप्रतीतेर्दुर्वारत्वादिति चेत् द्वित्वादिकं द्वयोर्पर्याप्तमिति प्रतीत्यास्तत्सिद्धेः वस्तु
तस्तु पर्याप्त्याख्यविलक्षणसंबंधोऽप्रामाणिक एव उक्तप्रतीत्या द्वित्वादेर्द्वित्वाद्यवच्छिन्नवृत्तिकत्वस्य विषयीकरणात् अन्यथा पर्याप्त्यं
गीकारेऽप्युक्तरीत्या निर्वाहात् । न चाभेदेनावच्छेद्यावच्छेदकभावानुपपत्तिरिति वाच्यं द्वित्वादिव्यक्तीनां नानात्वेनैकस्य द्वित्वादेर्वृत्त्यावपर ग॰म॰
स्यावच्छेदकत्वे बाधकाभावात् न च पर्याप्तेरनंगीकारे एको न द्वावित्यादिप्रतीतेः समवायसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदविष ३७

यकत्वमेव वाच्यं तच्च न संभवति एकस्मिन्नपि द्वित्वादिसमवायसत्त्वादिति वाच्यं एकस्मिन् द्वित्वादिसमवायसत्त्वेपि द्वित्वाद्यावुभयादिप्रवृत्ति
धर्मावच्छिन्नत्वोपगमेनान्यतरत्वावच्छेदकैकत्वावच्छेदेन तद्वत्त्वोपेरस्य तद्वत्त्वोबाधकाभावात् अन्यथापर्याप्त्यसंगीकारेप्यगतेरिमस्यासकृदावेदितत्वा
त् अत्र नव्याः आकाशवित्यादिवाक्यजन्यशाब्दबोधस्य भ्रमत्वोपपादनाय पर्याप्त्याख्यविलक्षणसंबंधस्याकारस्यावश्यकः तादृशबुद्धेः स
मवायविषयकत्वे घटाकाशादिवृत्तिद्वित्वादिसमवायस्याकाशावृत्तित्वेन भ्रमत्वोपपादनस्याशक्यत्वात् नचोभयवृत्तिधर्मावच्छेदेने
व समवायेन द्वित्वस्याकाशादौ वृत्तेः शकाशत्वाद्यवच्छेदेन तेन संबंधेन तदभावसत्त्वात् भ्रमत्वमुपपद्यत इति वाच्यं हेत्वेः संयोगवानित्यादि
ज्ञानस्य भ्रमत्वापत्तिवारणाय निरवच्छिन्नतदभाववति तत्प्रकारकज्ञानस्यैव भ्रमत्वपाऽऽकाशत्वाद्यवच्छिन्नद्वित्वाभाववत्त्वाभ इदाय भ्रमत्व
स्योपपादयितुमशक्यत्वात् नच पर्याप्तेः संसर्गतोपगमेपि नदोषतादवस्थ्यं घटाकाशादौ द्वित्वादेः पर्याप्तिसत्त्वे प्रत्येकमाकाशादौ पर्या
प्तिर्नास्तीत्यस्य वक्तुमशक्यत्वात् प्रत्येकस्मिन्नुभयातिरिक्तत्वादिति वाच्यं उद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेरेव संसर्गतोपगमात्
आकाशत्वादिव्याप्यतापन्नद्वित्वादिपर्याप्त्यसत्त्वा नचैवमुद्देश्यतावच्छेदकव्याप्यत्वविशिष्टसमवायस्य संसर्गतोपगमेनैव निर्वाहे किं पर्या

३८ स्येतिवाच्यं तथासति घटादिविषयादिवाक्यजन्यबोधस्यापि भ्रमत्वापत्तेः समवायस्यैक्येन घटादिनिष्ठस्य द्वित्वादिसमवायस्य पटादावपि सत्त्वेन
38 घटत्वाद्यव्याप्यत्वात् न चोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेः संसर्गत्वोपगमेपि कथं भ्रमत्वोपपत्तिः तादृशविशिष्टसंसर्गस्याप्रसिद्ध
त्वेन तेन संबंधेन भ्रमत्वायोगादिति वाच्यं द्वित्वादिपर्याप्तावन्यत्र प्रसिद्धस्याकाशत्वादिव्याप्यत्वस्य भ्रमस्वीकारात् न चैवं संबंधांशे भ्रमत्वे
फलिते तज्ज्ञानसंभवति तदभाववद्विशेष्यतानिरूपिततत्प्रकारताशालिज्ञानत्वस्य भ्रमत्वपासंबंधांशे विशेष्यत्वप्रकारत्वयोरभावादि
तिवाच्यं सांसर्गिकविषयतायामपि विशेष्यतात्वप्रकारतात्वयोरंगीकारेणोक्तदोषाभावात् न चैवं तदभाववत्ताज्ञानकाले तत्संसर्गकज्ञा
नस्याप्यनुदयप्रसंग इति वाच्यम् इष्टत्वात् तदभाववत्ताज्ञानप्रतिबध्यतावच्छेदककोटौ प्रकारतायां सांसर्गिकविषयताभिन्नत्वनिवेशेनोक्तदो
षवारणसंभवाच्चेत्याहुः तच्चिंत्यं एवमपि पंचैकघटतात्पर्येण घटाव्याविति वाक्यप्रयोगस्य तादृशवाक्यजन्यशाब्दबोधस्य भ्रमत्वोप
पत्त्यसंभवात् घटद्वयवृत्तिद्वित्वस्य घटत्वव्याप्यपर्याप्तिसंबंधेनैकघटेपि सत्त्वात् अथ यत्तज्ज्ञानीयतत्प्रकारतानिरूपितविशेष्यतात्वेपा राम०
त्विन्निरूपिताधिकरणतावच्छेदककिंचिद्धर्मव्यापकतानवच्छेदकं तज्ज्ञानीयतत्प्रकारकत्वमेव तज्ज्ञानस्य तद्भ्रमत्वं वाच्यं प्रकृते च घटद्वयवृत्तिद्वित्वप्रकार ३८

३९ तानिरूपितविशेष्यत्वमेकं घटत्ववत्तादृशवृत्तित्वाधिकरणतावच्छेदकवृत्तित्वं तं च घटांतरेपीति न तु व्यापकतानवच्छेदकत्वं तादृशविशेष्यताव
स्येति तादृशवाक्यजन्यशाब्दबोधस्य भ्रमत्वोपपादनसंभवेन तादृशपर्याप्तिः संसर्गतास्वीकारस्य व्यर्थत्वात घटाकाशोभयवृत्तित्ववृत्तित्व
प्रकारतानिरूपितविशेष्यत्वस्याकाश एव सत्वेन तादृशवृत्तित्वाधिकरणतावच्छेदकवृत्तित्वं तस्य च घटेपि सत्वेन तादृशवृत्तित्वप्रकारतानि
रूपितविशेष्यतात्वस्य तादृशवृत्तित्वनिरूपिताधिकरणतावच्छेदकवृत्तित्वं तन्निरूपकं किंचिद्धर्मव्यापकतानवच्छेदकत्वात् तस्मात्साध्याभा
ववद्वृत्तित्वरूपव्याप्तेः साध्यसामानाधिकरण्यनिवेशस्यानवकाश एव तया तन्निवेशप्रयुक्तगौरवलाघवान्यायेन तद्व्याप्त्यवगाहिपरामर्श
एवानुमितिहेतुर्न तु गुरुशरीरव्यापकसामानाधिकरण्यरूपव्याप्त्यवगाहिपरामर्शोनुमितिहेतुरिति सिद्धमिति कृतं पल्लवितेन नव्यदी
त्यापरामर्शेनुमाहेतुत्वमद्भुतं महादेवेन गदितं तनोति विदुषां मुदं अतिभावनयालब्धं श्रमेयं नूतनं हि यत् न हत्रगत्य तां सत्सु महद्दृष्टि।
मालंव्य सज्जनाः इति पुण्यस्तंभकरोपनामकमहादेवविरचितोनुमानानुमितिपरामर्शकार्यकारणभावविचारः समाप्तः श्रीवासुदेवार्पण राम०
मस्तु॥ ३९